बिपिनचन्द्रपालः



श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् – गुजरातम्

।। बिपिनचन्द्र पालः ।।

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

लेखकः

प्रा. कुलीन ग. उपाध्यायः

अनुवादकौ

डॉ. भावप्रकाशः एम. गांधी

प्रा. पङ्कज एस. रावलः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५
जुनागढजनपदम् (गुजरात)

कार्यसंयोजकः -

श्री दशरथः जादवः
उपकुलसचिवः

परामर्शनसमितिः -

डॉ. नरेन्द्रकुमार पण्ड्या
डॉ. देवेन्द्रनाथः पाण्डेयः
प्रा. ललितः पटेलः
डॉ. शत्रुघ्न पाणिग्राही

प्रथमं संस्करणम् - फरवरी, २०१३
ISBN -13 978-81-925721-1-6

प्रतयः - ३००

मूल्यम् - ५०/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **'विश्वसंस्कृतपुस्तकमेलायां'** श्रीसोमनाथ-संस्कृतविश्वविद्यालयः गुजरातराज्यगांधीनगरद्वारा प्रकाशितायाः **'सरफरोशश्रेण्याः'** कतिपयगुजरातीभाषायां प्रणीतग्रन्थानां संस्कृतभाषायाम् एकस्मिन् अभियानेऽनुवादं कारयित्वा तेषां प्रकाशनमपि विश्वविद्यालयः करोति। तदन्वयेनान्येषां नवोदितलेखकानां प्राप्तप्रतिष्ठानां लेखकानाञ्चा-प्रकाशितपुस्तकानां प्रकाशनमपि कर्तुं प्रवृत्तोऽस्ति। अस्मिन्नेव सन्दर्भे **प्रा. कुलीन ग. उपाध्यायमहोदयेन** रचितोऽयं **डॉ. भावप्रकाश गांधी** तथा **प्रा. पङ्कज रावलाभ्याम्** अनुदितोऽयं **बिपिनचन्द्र पालः** नामधेयः ग्रन्थः सादरं प्रकाश्यते। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. पंकज एल. जानी

कुलपतिः

॥ अनुक्रमणिका ॥

***

प्रकरणम् - १

॥ जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते।
जननी जन्मभ्मिश्च स्वर्गादपि गरीयसी॥

युद्धे रावणं निहत्य लंकां विजित्य लक्ष्मणं प्रति श्रीरामचन्द्रः एत द् वचनं निगदति। हे लक्ष्मण! इयं लंका स्वर्णमयी वर्तते तथापि मह्यं न रोचते। यतः माता मातृभूमिश्च स्वर्गादपि महीयसी वर्तेते। ईदृशः मातृभूमिं प्रति गौरवभावः केवलं भारतदेशे एव दृश्यते। मातृभूमिं मातरं मत्त्वा 'वन्दे मातरम्' इति डिण्डिमघोषः भारतदेशे एव भवति।

कृति-प्रकृति-संस्कृतिषु भारतदेशः सर्वश्रेष्ठरूपेण विराजते। भारते वैदिक्याः दैविक्याः च संस्कृतेर्वन्दनं परापूर्वतः प्रचलतितराम्। हिमालयसदृशः नगाधिराजः, गंगायमुनासदृश्यः नद्यः, अरब-हिन्द-बंगालस्य सागराः भारदेशस्य शोभामतितरां वर्द्धयन्ति।

एतादृशः भारतदेशः जनानां संगठनस्य, बलिदानस्य, स्वाभिमानस्य अथवा समर्पणस्य निर्बलतावशाद आंग्लजनैः परतन्त्रः कृतः। एतादृशस्य भारतदेशस्य पराधीनत्वश्रृंखलां त्रोटयितुं कायेन, मनसा च वित्तेन च बलिदानं दत्तवतां महापुरुषाणां समर्पणकथां श्रुत्वा कस्य देशभक्तस्य जनस्य मनः न प्रसीदति ?

Flag folows the trade - 'राज्यसत्ता आर्थिकसत्तामनुसरति' इति न्यायेन व्यापाराय आगता 'ईस्ट इन्डिया कम्पनी' भारते पदप्रवेशं कृत्वा शनैः शनैः राज्यसत्तां प्राप्तवती। आभ्यन्तरकलहः अहंभावश्च परतन्त्रतायाः प्रमुखे कारणे आस्ताम्। यथा आकाशे देदीप्यमानसूर्योऽपि राहुणा ग्रस्यते तदा सोऽपि किञ्चित्क्षणमदृश्यो भवति परंतु यथार्थतया सः न लुप्यते। तद्वत् भारतस्य संस्कृति-स्वतन्त्रतायै अपि एतादृशमेव परतन्त्रतारूप-ग्रहणमेवासीत्।

१८५७ ई. शताब्द्याः स्वातन्त्र्यसंग्रामः स्वतन्त्रतायै यद्यपि निष्फलः अभवत् तथापि देशे स्वातन्त्र्यभावनायाः प्रचण्डज्वाला सर्वत्र प्रदीप्ता संजाता। 'निष्फलता सफलतायाः प्रथमं सोपानमस्ति' तथा 'मार्गे पतितः पाषाणा सोपानस्य कारणं भवति' इत्युक्तिद्वयमाश्रित्य निष्फलीभूतस्वातन्त्र्यसंग्रामपावकात् समुत्पन्नः अग्निकिरणरूपः श्रीबिपिनचन्द्रपालः आसीत्।

१८५७ ईसवीयवर्षतः अनन्तरं समुत्पन्नविभूतोनामितिहासः भगवतः कृष्णस्य 'सम्भवामि युगे-युगे' इति प्रतिज्ञां स्मारयति।

महान् राष्ट्रभक्तः

आधुनिकभारतस्य अग्रणी राजकीयगणाग्रगण्येष्वेकः बिपिनचन्द्रपालः अतिधीरः चरित्रवान् चासीत्। सः पाश्चात्यशिक्षणं प्राप्यापि यूरोप-अमेरिकादिदेशेषु प्रवासं कृत्वापि प्रखरः भारतीयराष्ट्रभक्तः आसीत्। निजराजकीयादर्शकारणेन सः भारतस्य संक्रान्तिकाले उद्भूतसमस्यानां निवारणाय तत्परो नाभवत्।

विचारकरूपेण भारतीयप्रजास्वयं अप्रतिमं स्थानं प्राप्नोत्। सः तत्कालीनयुवकेभ्य राष्ट्रवादस्य स्वनिर्णायकत्वस्य स्वसाहाय्यरूपस्य विषये शिक्षां दत्तवान्। राष्ट्रवादस्य विषये श्रीपालः वदति यत् 'भारते अधुना एतादृशः एकः मार्गः वर्तते यः स्वात्मानं राष्ट्रवादिरूपेण गणयति। एषः न केवलं राजकीयकार्यक्रम एव अपितु धर्मोप्यस्ति। एषः तादृशः मार्ग अस्ति यत्र सर्वैरपि जीवनं यापनीयं तथा सर्वं सोढव्यं भविष्यति। अद्य बौद्धिकछलेन सह स्वात्मानं राष्ट्रवादिरूपेण कथने न कस्याप्यधिकारोऽस्ति। भारते राष्ट्रवादितायाः आशयः ईश्वरस्य दूतत्वम् आध्यात्मिकजीवनं च वर्तते। सः नूनं विश्वसिति स्म यत् भारतस्य प्रजायाः जागरणस्य परिबलं दिव्यं वर्तते यत् मानवं राष्ट्रवादं प्रति नयति। राष्ट्रियहेतूनां सिद्ध्यर्थं शारीरिकरूपेण निरामयत्वं, राजकीयरूपेण सम्पूर्णता वे आवश्यके न स्तः किन्तु ईश्वरीयनियतौ दृढविश्वासः परमावश्यकः।

क्रान्तिवीरत्रयम् (त्रितयम्)

स्वतन्त्रतायाः आन्दोलने सम्पूर्णदिशे लाल-बाल-पालेतिनाम्ना त्रिपुटी नितरां प्रसिद्धाऽभवत्। तेषु 'पाल' अर्थात् बिपिनचन्द्रपालस्य विचारैः ब्रिटीशसाम्राज्यवादस्य मूले प्रहारः सर्वाधिकरूपेण जातः। बिपिनचन्द्रपालः मूलतः राष्ट्रवादी आसीत् तथापि वैदेशिकनियंत्रणात् भारतस्य मुक्तये तस्य समीपे सुस्पष्टं चित्रमासीत्। सः बाह्यविश्वात् भारतं भिन्नं कर्तुं नेच्छति स्म, स तु आंग्लीयैस्सह कोमनवेल्थप्रकारकं तन्त्रं निर्मातुमैच्छत्। यत्र तैः सह भारतस्य गुणवत्तायुक्तायाः 'सहकारी भागग्राहितायाः' अस्तित्वं भवेत्। अस्मिन्विषये १९०८ तमे वर्षे सः ब्रिटेनयात्रायां निजप्रवचनेन भारतस्य दयनीयस्थितेः वर्णनं चकार, अपि च भारतवर्षं स्वाश्रयि संवैधानिकसर्वकाररचनायां सक्षमं भवेत्तदर्थं साहाय्यार्थं ते प्रार्थिताः।

बिपिनचन्द्रपालः आंग्लजनानां राजतन्त्रस्य प्रखरः टीकाकारः आसीत्। सः भारतस्य आर्थिकशोषणं विशेषेण निन्दितवान्। 'ध न्यू इकोनोमिक मिनेस टु इन्डिया' इति निजपुस्तके एतद्विषये सः भारतीयान् प्रबोधितवान्। देशस्य दयनीयस्थितये 'ईस्ट इन्डिया कम्पनी' एव कारणभूतेति तैः ग्रन्थेऽस्मिन् उट्टंकितम्।

बिपिनचन्द्रपालः जनानां राजकीये एवं आर्थिकजीवने रुचिं दधौ तेन सहैव सः सामाजिकशैक्षणिकपरिवर्तनस्य पक्षधरोऽपि आसीत्। तत्कालीनस्य बाल-विवाहस्य विधवाप्रथायाश्च सः विरोधमपि कृतवान्। तद्दूरीकर्तुं च दण्डव्यवस्थाया अपि समर्थनं कृतवान्। विधवाविवाहाय प्रोत्साहने बालविवाहस्य विरोधे च स अग्रेसरः आसीत्। ब्रह्मसमाजस्य सभ्यत्वेन एतादृश्याः प्रथायाः विरोधं कृत्वा स्वप्राणाः अनेन संकटे पातिताः। ज्ञातिवादस्य अस्पृश्यतायाश्च विषये सः कथयति यत् ''इमे देशस्य सामाजिकप्रगतेः राजकीयप्रगतेश्च कृते बाधकाः सन्ति।'' शिक्षाजगति अपि परिवर्तनाभिलाषी श्री पालः आसीत्। प्राच्यार्वाचीनशिक्षाप्रणाली एव शिक्षाजगति आवश्यकी केवलं पाश्चात्यशिक्षायाः अन्धानुकरणं भारतेन न कार्यम्। आस्माकिनी शिक्षा उदारवादिनी वैज्ञानिकतथ्यरहिता च न भवतु इत्यपि सः विश्वसिति स्म।

बिपिनचन्द्रपालः अग्रगण्येषु राष्ट्रियविचारकेषु एकतम आसीत्। तेन स्वतन्त्रतान्दोलनसमये तस्य लेखैः भाषणैश्च, जीवनपर्यन्तं राष्ट्रकार्ये अपूर्वं योगदानं प्रदत्तमासीत्। दीर्घदृष्ट्या सः भारतीयानाम् अन्तरात्मानं जागरयित्वा अग्रिमपरम्परायाः कृते मनसि प्रेरणाज्योतिं प्रकटयामास।

*

प्रकरणम् - २

।। जन्म बाल्यावस्था च ।।

१८५७ ईसवीयवर्षस्य स्वातन्त्र्यसंग्रामाग्निः भवतु नाम बहिस्तात् शान्तः परन्तु शान्तिरियं बहिस्तः एव, अन्तस्तु प्रचण्डाग्निः आसीदेव। एतस्मिन्नैव समये भारते ७ नवम्बर १८५८ तमे वर्षे 'सिलहट' जनपदे 'पोइल' नामधेयग्रामे श्रीमन्तहिन्दूब्राह्मणकुटुम्बे बाबू रामचन्द्रपालस्य गृहे एकस्य बालस्य जन्माऽभवत्। तस्य नामधेयमासीत् बिपिनः। अग्रे गत्वा स एव बिपिनचन्द्रपालः इति नाम्ना प्रख्यातः जातः।

श्रीपालेन मातुः गर्भे एव स्वतन्त्रतायाः संस्काराः सम्प्राप्ताः। देशस्य वातावरणं मातृभूमिं स्वतन्त्रां कर्तुं तीव्रमासीत्। निष्फलो गतः आक्रोशः द्विगुणितो भूत्वा अस्मिन्बाले सहजतया प्रविष्टः।

बिपिनचन्द्रस्य पिता बाबू रामचन्द्रपालः आर्थिकस्थित्या सम्पन्नः आसीत्। न केवलं लक्ष्मी एव अपि तु सरस्वती अपि तत्र प्रसीदति स्म। बाबू रामचन्द्रपालः 'पर्शियन' भाषायाः महाविद्वान् आसीत्। सः व्यवसायेन अधिवक्ता आसीत्। अधिवक्तृव्यवसाये सः अतिप्रसिद्धिमवाप। इत्थं लक्ष्म्याः सरस्वत्याः च सुभगसमन्वयः तस्मिन्सहजतयावलोक्यते स्म।

उत्कृष्टपितृकुले जाते बिपिनचन्द्रपाले चिन्तनतर्कयोः अनायासेन प्रवेशः स्वाभाविको प्रतिभाति। बाबू रामचन्द्रपालः विद्वत्त्वेन अग्रगण्यः आसीत्। एतस्य विशालज्ञानस्य, आन्तरिककुशलतायाः प्रभावेण समाजे तस्य महती प्रतिष्ठाऽसीत्। ब्रिटिशसर्वकारः सम्मानरूपेण जनपदस्य न्यायाधीशरूपेण (मुनसफ) तस्य नियुक्तिमकरोत्। इत्थं रामचन्द्रपालः समाजे नाम्ना, धनेन, कर्मणा च उन्नतं पदंप्राप्नोत्।

बाबू रामचन्द्रः दृढः हिन्दु आसीत्। स्वजीवने स वैष्णवाचाराणां पालनमकरोत्। बिपिनचन्द्रस्य माता अशिक्षिताऽसीत्तथाऽपि व्यवहारे गृहकर्मणि च अतिदक्षा आसीत्। त्यागबलिदानभावनया परिपूर्णा सा विशालकुटुम्बहितं समाजहितं च सदैव चिन्तयति स्म। स्वविचारमकृत्वा सर्वविचारं साऽकरोत्। सा आचारविचारविषये अनुशासनस्य आग्रहमकरोत्। बिपिनचन्द्रपालः मातुः पितुश्च केवलमेका एव सन्ततिरासीत्। अस्य पालनं संस्कार-संस्कृत-संस्कृतिपूर्वकं पितरौ अकुरुताम्।

लालयेत्पञ्चवर्षाणि दशवर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥

इति श्लोकानुसारं पिता रामचन्द्रः पुत्रस्य बिपिनस्य पालनमकरोत्।

जीवनादर्शाः

पितुः गुणाः बिपिनचन्द्रेण परम्परया प्राप्ताः आसन् अतः बिपिनचन्द्रोऽपि निर्भयः कर्तव्यनिष्ठश्चासीत्। बिपिनचन्द्रः स्वजीवनविकासे मातापितृणं स्वीकुर्वन् कथयति-यौ मे मनः सदा सर्वदा प्रेरितवन्तौ, मानवरूपेण जीवनं जीवितुं यः आदर्शः मयाऽधिगतः तस्य प्रेरणामूर्तिरूपौ मे पितरौ स्तः। अयमादर्शः जीवन्तरूपेण स्थापयितुम् एकस्य कृते अपरस्य त्यागः, स्वभूमिकयाः पार्श्वभूमिकारूपेण स्थापनमित्यादिकं तौ शिक्षितवन्तौ। संयम-उदारतादिगुणाः पुस्तकात् मया न गृहीताः अपि तु पितृभ्यामेव चारित्र्यपाठाः मया पठिताः।

बिपिनचन्द्रपालः स्वभावेन दृढनिश्चयः आसीत्। तस्यान्तःकरणं यां स्वीकरोति स्म तामेव वार्तां सः मन्यते स्म। परन्तु यदा सः जानाति स्म यत् मदीय मंन्तव्यमसम्यक् वर्तते तदैव सः त्रुटिं मत्वा शुद्धयै प्रयत्नमकार्षीत्। तत्र लज्जां संकोचं च नानुभवति स्म। अनेनैव स्वभावेन पित्रा सह कदाचित् संघर्षः अपि भवति स्म इत्यपि सत्यमेव।

आबाल्यादेव पठने सामान्यः आसीत्। तेजस्विषु छात्रेषु स न गणयितु शक्यते परन्तु इतरपठने तस्य रुचिरासीत्। तर्कबद्धविचारणेन तथा सत्यस्वीकरणेन च सः देशस्य महत्सु देशभक्तेषु परिगण्यते।

बिपिनचन्द्रः परिवर्तनशीलः आसीत् परंतु अस्थिरमना नासीत्। परिस्थत्यनुकूलं सः परिवर्तनं कर्तुं सक्षम आसीत्। बिपिनचन्द्रस्य जीवनस्य विचारेषु देशभक्तिः, वैचारिकस्पष्टता, तथा कुप्रथाविरोधबलं सम्यक्रूपेण द्रष्टुं शक्यन्ते। इमे तेषां प्रशंसनीयगुणाः आसन्।

*

प्रकरणम् - ३

।। शिक्षणं व्यवसायः कौटुम्बिकजीवनञ्च ।।

बिपिनचन्द्रस्य शैक्षणिकसमयः सर्वथा उज्ज्वलः तथा प्रभावकारकः आसीत् इति वक्तुं न शक्यते। सः सामन्याभ्यासक्रमस्य पुस्तकानामपेक्षया इतरवाचने रुचिं स्थापयामास। बहुधा यथा लोके दृश्यते तथा बिपिनचन्द्रः चिन्तकः विचारकः सन्नपि शैक्षणिकयोग्यतायां सामान्यः आसीत्। विधेः वैचित्र्यं कथयतु उत वा वैशिष्ट्यं यत् रवीन्द्रनाथटागोरसदृशः शैक्षणिकयोग्यतया उत्कृष्टः न सन्नपि 'नोबेल पुरस्कारं' विजितवान्।

वर्गखण्डात् बहिः

बिपिनचन्द्रपालस्य प्रारम्भिकं शिक्षणं 'मौलवी' पार्श्वे अभवत्। पुनः 'सिलहट विद्यालये' सः प्रवेशपरीक्षामुत्तीर्य १८७५ ईसवीयवर्षे कलकत्तानगरस्य 'प्रेसिडेन्सी महाविद्यालये' प्रवेशं प्राप्तवान्। महाविद्यालये उपस्थित्यपक्षेया अनुपस्थितिः तेस्यामधिका आसीत्। सः स्वीयात्मकथायां एतद्वृत्तान्तं स्मरन् कथयति - प्रायः अहं कक्षायां कतिपयहोराः अथवा एकार्द्धहोरा एव उपस्थितः भवामि स्म। अधिकांशभागं बहिरेव भवामि स्म।

एतस्य अनुपस्थितेः कारणं तस्य स्वच्छन्दवृत्तिः, नगरीयजीवनस्य आनन्दप्राप्तिर्वा नासीत् परन्तु सः महाविद्यालयात् किञ्चिद्दूरं पुस्तकापणं गत्या पुस्तकपठने समयं यापयति स्म। इत्थं पठने तस्य अरुचिः नासीत्। अभ्यास ग्रन्थेषु तस्य प्रवृत्तिः न्यूनाऽसीत्, तथापि गीताया उपनिषदाञ्च तेन गभीराभ्यासः कृत आसीत्।

वाचनरसः

आंग्लभाषायां तथा बंगालीभाषायां तेन बहु वाचनं विहितमासीत्। विश्वविद्यालयसूचिताः अभ्यासक्रमाः तं नाकर्षन्ति स्म। एतादृशैरभ्यासक्रमैः सः सन्तुष्टः नाभवत्। तस्य अशान्तं संशोधने रतं च मनः अभ्यासक्रमात् सत्यदिक् नाप्नोत्। महाविद्यालयस्य प्रथमवर्षे एव सः वर्षद्वयं यापितवान् भाग्यवशाच्च तस्य महाविद्यालयशिक्षणस्य तत्रैव समाप्तिः संजाता। इत्थं सः स्नातकोपाधिरहितः अभवत्। शिक्षणत्यागस्य प्रमुखं कारणं तस्य आदर्शभूताः विचारा एवासन्।

ई. स. १८७७ तमे वर्षे यदा सः केवलं एकोनविंशतिवर्षीय एवासीत् तदा महाविद्यालयशिक्षणसमये एव केशवचन्द्रसेनस्य व्याख्यानैः प्रभावितः जातः। इत्थं केशवचन्द्रसेनः तस्य प्रेरणामूर्तिरभवत्। परन्तु स्वतन्त्रविचारधाराकारणेन केशवचन्द्रस्य नवीने ब्रह्मसमाजे सः संलग्नो नाभवत्।

युवकसंगठनम्

महाविद्यालयशिक्षणस्य समाप्तेर्मूलस्थिता घटना ई.स. १९७६ तमवर्षस्यासीत्। पालः यदा अष्टादशवर्षीयः आसीत् तदा सः शिवनाथशास्त्रिणः नेतृत्वे मित्रैः सह मिलित्वा एकं संगठनं रचयामास। एषा युवावस्था आदर्शाणां निर्माणाय, आचरणे स्थापनाय च सुवर्णकालः आसीत्। रुढिगतसमाजे स्थिताः कुप्रथाः नाशयितुं नवीनादर्शान् पालयितुं चैते युवकाः कटिबद्धाः आसन्। यत्र बिपिनचन्द्रपालनिर्मिते संगठने ब्रह्मसमाजस्य धार्मिका सामाजिकाश्चादर्शाः स्वीकृतास्तत्रैव सुरेन्द्रनाथबेनरजीमहोदयस्य राजकीयादर्शा अप्यङ्गीकृता आसन्।

ब्रह्मसमाजः निश्चप्रचमीश्वरे विश्वसिति स्म, परंतु मूर्तिपूजायाः विरोधमकार्षीत्। तत्र कर्मकाण्डस्य अस्वीकारः आसीत्। जातिभेदभाव-स्पृश्यास्पृश्यप्रथा-बालविवाह-बहुपत्नीप्रथा-मुखाच्छादनप्रथादीनां ब्रह्मसमाजः विरोधं करोति। विधवा-पुनर्विवाहस्य एषः समाजः समर्थनमकरोत्। इत्थं बिपिनचन्द्रपालस्तथा अन्ये सुहृदः एतेषामादर्शानां पालनाय प्रतिज्ञामकुर्वन्।

शुद्धिवादविचाराः

बिपिनचन्द्रपालः येषामादर्शानां पालनाय प्रतिज्ञामकरोत् ते रुढिवादिसमाजस्य कृते कठिनाः आसन्। स्वयं रुढिवादिविचारान्वितः पिता एतां प्रतिज्ञामाकर्ण्य पालेन सह सम्बन्धविच्छेदमकरोत्। अष्टादशवर्षे श्रीपालः इत्थं पितरि जीविते अपि अनाथवज्जातः। तस्य पिता, सम्बन्धिनः तथा मित्राणि तं बोधितवन्तस्तथापि शुद्धिवादविचारैः प्रभावितः, आदर्शपालनाय कटिबद्धश्च श्रीपालः नावगतवान्।

श्रीसम्पन्नः विद्यासम्पन्नश्च पिता पुत्रस्य व्यवहारेण खिन्नः जातः। तेन बिपिनचन्द्रः जातिबहि कारितः। सः स्वसम्पत्तिपत्रे उत्तराधिकारित्वेन न गणितः। पुनः आर्थिकसाहायात् श्रीपाल वञ्चितोऽभवत्। अतः मध्य एव महाविद्यालयशिक्षणम-पूर्णमभवत्। आदर्शपूर्णजीवनाय कस्यापि त्यागः अपेक्ष्यत एव। यद्यपि शिक्षणमपूर्णं तथापि

जिज्ञासावृत्तिस्तु तस्य मनसि तीव्रासीत्। विविधज्ञानाभिलाषी सः पुष्कलमितरवाचनं कृतवान्, परिणामेन सः चिन्तनशीलः विचारकश्चाभवत्।

शिक्षकत्वेन श्रीपालः

बिपिनचन्द्रपालः शैक्षणिकजीवनस्य प्रारम्भं ई. स. १९७८ तमे वर्षे अकरोत्। कटकस्य विद्यालये सः मुख्यशिक्षकत्वेन (हेड मास्टर) नियुक्तिं प्राप्तवान्। किञ्चित्काल-पर्यन्तं सर्वं सम्यक् प्रचलितं परन्तु विद्यालयस्य स्वामिना सह विचारभेदे जाते स शालां त्यक्तवान्। कटकं परित्यज्य सः कलकत्तानरं गतः तदा तस्य द्वाभ्यां मित्राभ्यां वजेन्द्रनाथसेनेन तथा राजचन्द्रचौधरीवर्येण अपि सः विद्यालयः त्यक्तः। इत्थं ताभ्यां आदर्शमित्रतायाः ज्वलन्तदृष्टान्तः प्रस्तुतः।

कटकं परित्यज्य मित्राभ्यां सह स सिलहटविद्यालये अध्यापनं स्वीचकार। राजचन्द्रचौधरिणा एवं वजेन्द्रनाथसेनेन सह स्थित्वा तेन विद्यालयस्य उच्चादर्शानां स्थापनाय मनसा वाचा कर्मणा च प्रयत्नः विहितः। एषः विद्यालय एक आदर्शविद्यालयः भवेत्तदर्थं तेन बहवः कार्यभाराः ऊढाः तथा कष्टानि सोढानि। १८७८ तमे ईसवीयवर्षे दिसम्बरमासे सः शिक्षकत्वेन स्वजीवनं 'सिलहट राष्ट्रीय शालायां' प्रारब्धवान्।

अहर्निशं किमपिअदृष्ट्वा विद्यालयस्य विकासाय सः अतिरिक्तं कार्यभारं गृहीतवान्। पालस्य आर्थिकस्थितिः सामान्याऽसीत्, सिलहटशालायां कानिचन वर्षाणि स्थितः। तेषु वर्षेषु अधिकेन परिश्रमेण, कार्यस्य अतिरिक्तभारेण तथा पौष्टिकाहारस्य अभावेन सः अतीव रुग्णः जातः। अनेन तस्य शरीरं शिथिलमभवत्। योग्यचिकित्सकस्य परामर्शाय, उपचाराय, विश्रामाय च तस्मै कलकत्तागमनाय परामर्शः प्रदत्तः। अन्ततोगत्वा सः अनिच्छन्नपि कलकत्तानगरमागतः।

कलकत्तानगरे किञ्चित्समयमुपचारं विश्रामं च कृत्वा तेन किञ्चित्स्वस्थताऽधिगता परन्तु आर्थिकस्थितेः अनानुकुल्येन पौष्टिकाहारः शक्यः नाभवत्। पिता अपि आर्थिकसाहाय्यं नाकरोत्। शनैः शनैः सः चिकित्सकस्य उपचारेण स्वस्थोऽभवत्।

मुख्यशिक्षकत्वेन पालः

ईसवीय १८८१ तमवर्षस्य अगस्तमासे सः बैंग्लोरनगरस्य 'आर्कोट-नारायण-स्वामी-मुदलियार-हाईईंग्लिशविद्यालये' मुख्यशिक्षकस्य उत्तरदायित्वं न्यवहत्। अस्मिन्विद्यालये सः वर्षद्वयं स्वकर्तव्यं पालयन् स्थितवान्। एतस्मिन्नैव काले ब्रह्मसमाजस्य

स्थानिकशाखायां निजसेवां प्रददौ तथा लोकवक्तृरूपेण सः ख्यातिं प्राप्तवान्। बैंग्लोरनगरस्य विद्यालये यदा मुख्यशिक्षकरूपेण कार्यं कुर्वन्नासीत् तदा स विवाहमकरोत्। ब्रह्मसमाजस्य आदर्शानुसारिणी 'नृत्यकली' नामधेया सुंदरी विधवा तस्य धर्मपत्न्यासीत्। यदा रूढिवादिसमाजः विधवापुनर्विवाहं स्वीकर्तुं सज्जः नासीत्तदा विधवया सह विवाहं कृत्वा क्रान्तिकारिकार्यमकरोत्। स्वाभाविकमेव यत्तेन कारणेन पालः पितुः कुटुम्बस्य समाजस्य च क्रोधं असहत्।

ग्रन्थपालत्वेन श्रीपालः

पुनः संयोगवशात् सः बैंग्लोरनगरं त्यक्त्वा कलकत्तानगरमागतः। अत्र च सार्वजनिकपुस्तकालये सः ग्रन्थपालस्य उत्तरदायित्वं न्यवहत्। अस्मिन्नैव समये तेन पाश्चात्यसंस्कृतेः गहनाभ्यासः कृतः ग्रन्थपालस्य कार्यभारेण ग्रन्थपठनस्य रुचिः पुष्टा जाता। पाश्चात्त्यसंस्कृतेः कतिपयसिद्धान्ताः निजादर्शस्य पुष्टिं कुर्वन्ति इति ज्ञात्वा पाश्चात्त्यसंस्कृतिं प्रति स्नेहः प्रवर्द्धितः।

कौटुम्बिकजीवनम्

'ईश्वरेच्छा बलीयसी' इति न्यायेन तस्य जीवने अधिकाः कठिनताः आगताः। तस्य धर्मपत्नी अकाले एव दिवंगता। पुत्रीत्रयं पुत्रैकं च विहाय नृत्यकली यदा पञ्चत्वे विलीना तदा तस्य हृदयं पूर्णतया भग्नमभवत्। एकत्र कुटुम्बिनः विमुखाः जाताः चेत् अपरत्र अर्धाङ्गिन्याः स्वर्गवासः जातः, अनेन सः पूर्णतया एकाकी अभवत्।

भग्नहृदयेन पालेन गृहं परित्यज्य साधूनां दले आश्रयो गृहीतः। दुःखग्रस्तं मनः तदाऽपि शान्तं नाऽभवत्। परन्तु भगवतः कृपया सत्सङ्गस्य तस्य मनसि अतीवप्रभावः जातः। शनैः शनैः सार्द्धैकवर्षस्य समये गते दुःखं न्यूनमभवत्। 'दुःखस्य दिनानि औषधानि भवन्ति' इति न्यायेन बिपिनः वास्तविकतां स्वीकृत्य सांसारिकजीवनं प्रति पुनरायातः।

कानिचनमित्राणि तं पुनर्विवाहाय कथितवन्तः तदा बहुकालं विचार्य सः विवाहाय पुनः सज्जीजातः। सः पुनर्विवाहोऽपि विधवया सहैव कृतवान्। सुरेन्द्रनाथबेनर्जीमहोदयस्य भागिनेय्या सह तेन वैवाहिकजीवनस्य नवीनः प्रारम्भः कृतः। अनया पत्न्या द्वौ पुत्रौ द्वे पुत्र्यौ च संजाताः।

निजव्यावसायिकजीवने तथा कौटुम्बिकजीवने स्थिरो भूत्वा सः राजकीयप्रवृत्तौ रतः जातः पुनश्च राजनीतौ प्रवेशं कृतवान्।

*

प्रकरणम् - ४

॥ विचारधारायाः प्रेरणास्रोतांसि ॥

१८५७ ईसवीयवर्षे स्वातन्त्र्यसंग्रामस्य दुन्दुभिः वादितः परन्तु अनेकैः कारणैः ध्येयसिद्धिः न जाता। १८५८ तमे वर्षे समुत्पन्ने बिपिनचन्द्रे स्वतन्त्रताप्राप्त्यर्थं तीव्रेच्छायाः स्फुलिङ्गाः स्वतः एवोत्थिताः। सकलं वायुमण्डलं देशं स्वाधीनं कर्तुं सज्जमासीत्। एतादृशे वातावरणे जाते शिशुलोहिते क्रान्तेः स्वतन्त्रतायाः तीव्रवेदनायाः प्रकटनं स्वाभाविकमेव। सकलं वातावरणं राजकीयक्रान्तियुक्तप्रवृत्त्या प्रपूरितमासीत्। अतः तस्मिन् बाल्यकालादेव देशभक्तिभावना आसीत्।

बिपिनचन्द्रपालस्य विचारधारायाः निर्माणे अधस्तनानिप्रेरणास्रोतांसि महत्त्वपूर्णं भागं भजन्ते।

१) पितरौ

'नास्ति मातृसमो गुरुः' इति महाभारतवचसा ज्ञायते यत् मातुः पुत्रस्य जीवननिर्माणे मातुः अतीव महत्त्वं भवति। बालकस्य विचारधारानिर्माणे जाननजानन् मातुः प्रभावः अत्यधिको भवति। पितरौ बालकस्य प्रथमौ गुरू भवतः।

शिक्षितः अर्थसम्पन्नश्च पिता कठोरानुशासनस्य आग्रही आसीत्। रुढिवादे, धर्मे, कर्मकाण्डे च पिता भृशं विश्वसिति स्म। स्वाभाविकमेव यत् निजसन्ततिरपि तस्मिन्पथि प्रचलेत् इत्यभिलाषा तस्य पितुरासीत्। परन्तु अस्मिन्विषये बिपिनचन्द्रस्य विचारधारा पृथगासीत्। चिन्तने अनुशासने च विपिनचन्द्रपालः पितरमनुसरति स्म।

२) राजा राममोहनरायः तथा ईश्वरचन्द्रविद्यासागरः

मनुष्य सामाजिकप्राणी अस्ति। मानवस्य समाजस्य च मध्ये अविनाभावेन सम्बन्धोऽस्ति। बिपिनचन्द्रोऽपि मानवस्य समाजस्य च विषये सम्पूर्णरूपेणाविचारयत्। परिणामतः तस्य राजकीयविचाराः सम्पूर्णसमाजं स्पृशन्ति स्म।

भूतकालीनायाः वर्तमानायाः च परिस्थितेः सर्वाणि वस्तूनि ध्याने स्थापयित्वा विचारकरणे तस्य आदर्शमूर्तिः राजा राममोहनरायः आसीत्। सामाजिकक्षेत्रे धार्मिकक्षेत्रे च परिवर्तनं कर्तुं प्रयासं राजाराममोहनरायः अकरोत्। रूढिगतविचारधारायाः सः प्रबलं

विरोधमकार्षीत्। सः ब्रह्मसमाजस्य स्थापनां कृतवान्। अस्मिन् समाजे रूढिगतविचाराणां नाशेन नवीनपरिवर्तनमानेतुं प्रयासः क्रियते स्म। राजाराममोहनरायस्य जन्म मईमासस्य द्वाविंशतिदिनाङ्के ई.स. १७२२ तमे वर्षे ब्राह्मणकुले जातमासीत्। रुढिगतपरिवारे उत्पन्नः सन्नपि सः कुप्रथानां प्रबलं विरोधमकार्षीत्। जनः कर्मकाण्डं कुर्यात् तत्र न कश्चिद्दोषः परन्तु यदा कर्मठः भवति तदा तत्र बहवः दोषाः समुत्पद्यन्ते।

राजाराममोहनरायः संस्कृत-उर्दु-फारसी-अंग्रेजी-अरबी-फ्रेंच-ग्रीक-इटालियनादि बह्वीः भाषाः जानाति स्म। बाल्यकालादेव सः क्रान्तिकारिविचारकः आसीत्। पञ्चदश तमे वर्षे मूर्तिपूजायाः कठोरटीकाकारिणी एका पुस्तिकाऽपि तेन लिखिता। जातिभेदवाद-स्पृश्यास्पृश्यता-बालविवाह-बहुपत्नीप्रथानां तथा मुखाच्छादनप्रथायाः सः विरोधमकार्षीत्।

क्रान्तिकारिविचारकः बिपिनचन्द्रपालः राजाराममोहनरायस्य विचारैः आकृष्टः अभवत्। श्रीपालस्य शब्देषु कथयामश्चेत् 'यथा यूरोपमहाद्वीपे दांतेमहोदयः मध्ययुगीनायाः संस्कृतेः सर्वेषामेव धर्माणामुदात्तं तथा मूलभूततत्त्वं साररूपेण स्वीचकार तथैव राजाराममोहनरायोऽपि प्राचीनसंस्कृतेः सर्वाणि पवित्राणि, शाश्वततत्त्वानि च स्वजीवने प्रकटयामास। अनेन सहैव अर्वाचीनभारतीयजीवनस्य आदर्शाः अपि तेन आत्मसात्कृताः आसन्।

बिपिनचन्द्रपालः राजाराममोहनरायस्य अनुयायी आसीत्। सः आध्यात्मिक - राजकीय-आर्थिकस्वतन्त्रतायै कार्यं कृतवान्। एतस्याः विचारधारायाः निर्माणे राजाराममोहनरायस्य बिपिनचन्द्रपाले सम्पूर्णप्रभावः आसीत्।

ब्रह्मसमाजस्य संस्थापकः राममोहनरायः इव बिपिनचन्द्रपालस्य विचारधारानिर्माणे प्रभावोत्पादकः द्वितीयः महानुभावः ईश्वरचन्द्रविद्यासागरः आसीत्। इत्थम् ईश्वरचन्द्रोऽपि श्रीपालस्य प्रेरणामूर्तिरासीत्।

ईश्वरचन्द्रविद्यासागरस्य जन्म १२ सितम्बर, ई. स. १८२० तमे वर्षे बंगालप्रदेशे बिरसिंघनामधेये ग्रामे अभवत्। स्त्रीणां मुक्तिः, स्त्रीशिक्षणं तथा विधवापुनर्विवाहसदृशेषु सामाजिकशुद्ध्यादिकार्येषु सः महद्योगदानं दत्तवान्। शिक्षणक्षेत्रेऽपि तस्योत्कृष्टं प्रदानमासीत्।

ईश्वरचन्द्रविद्यासागरस्य विचारधारायाः श्रीबिपिनचन्द्रपाले गहनप्रभावः

आसीत्। बिपिनचन्द्रपालः स्वतंत्रविचारधारायाः स्वाभिमानपूर्णजीवनस्य च समर्थकः आसीत्। इत्थं राजाराममोहनरायस्य ईश्वरचन्द्रविद्यासागरस्य-सामाजिकशुद्धेः श्रेष्ठपरम्परया प्रेरितः बिपिनचन्द्रपालः सामाजिकप्रश्नानां समानं प्रतिकारमकरोत्। स्त्रीभ्यः सर्वबन्धनेभ्यः मुक्तिः लभेत्तदर्थं स अग्रेसर आसीत्। इयं विचारधारा १८९० ईसवीय वर्षस्य प्रारम्भे जनानां दृढसमर्थनेन तीव्रा सञ्जाता। श्रेष्ठाः यद् यदाचरन्ति अन्ये तमेव पन्थानमनुसरन्ति। यथा श्रीमद्भगवद्गीतायां श्रीकृष्ण आह -

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

इत्थं राजाराममोहनरायः ईश्वरचन्द्रविद्यासागरश्च श्रीबिपिनचन्द्रपालस्य विचारधारानिर्माणे महत्त्वपूर्णं भागं भजतः।

ब्रह्मसमाजः, वैष्णवसमाजः

बिपिनचन्द्रपालस्य विचारधारानिर्माणे ब्रह्मसमाजस्य वैष्णवसमाजस्य च महद्योगदानं वर्तते। शिवनाथशास्त्रिणः बीजोयकृष्णगोस्वामिनश्च विचारधारायाः श्री पाले अत्यन्तं प्रभावः जातः। तस्मिन्काले केशवचन्द्रसेनः अतिप्रसिद्धः आसीत्। श्रीपालः सेनस्य सायंप्रार्थनासभायां नूनमेवोपस्थितः भवति स्म तथापि तत्संस्थापिते ब्रह्मसमाजे पूर्णरुपेण दृढविश्वासः नासीत्। ब्रह्मसमाजेन सह स ऐक्यभावमपि नानुभवति स्म। केशवचन्द्रसेनस्य प्रवचनानां तदा अतिप्रभाव आसीत्।

ततः पालः लोकतन्त्रिकमान्ता परिपोषकस्य शिवनाथशास्त्रिणः सान्निध्यं प्राप्तवान्। शिवनाथशास्त्रिणः प्रगतिशीले ब्रह्मसमाजे तस्य मनः आकर्षितमभवत्। शिवनाथशास्त्रिणा सह संयुक्तेषु त्रिषु युवकेषु श्रीबिपिनचन्द्रः एकतम आसीत्। सः वैयक्तिक -सामाजिक-धार्मिक-राष्ट्रियस्वतन्त्रतायै शपथं गृहीतवान्।

शिवनाथशास्त्रिणः प्रगतिशीले ब्रह्मसमाजे, ब्रह्मसमाजस्य धार्मिकादर्शानां सामाजिकार्शानां तथा सुरेन्द्रनाथबेनरजीमहोदयस्य राजकीयादर्शानां सुभगसमन्वय आसीत्। मूर्तिपूजया जातिभेदेन सह कथमपि समाधानं न शक्यमिति मत्वा सः प्रखरविरोधं कृतवान्। नैतिकप्रश्नेषु अन्तरात्मनः प्रभुत्वं स्वीकृत्य स्वशासनमहत्त्वमपि सः स्वीचकार। शिवनाथशास्त्रिणः प्रेरणया स्थापिते दक्षिणब्रह्मसमाजे सः सभ्यो बभूव।

ब्रह्मसमाजस्य विचारधारायां श्रद्धान्विते बिपिनचन्द्रे वैष्णवतत्त्वदर्शनमपि प्रभावं जनयामास। वैष्णवसम्प्रदायस्य भक्तेः दृष्टिकोणेन मानवतायुक्तदृष्टिकोणेन च श्रीपालः

प्रभावित: सञ्जात:। यत्रापि शोभनं सम्यक्त्व स दृष्टवान् तत: किमपि शिक्षितुं प्रयासं कृतवान्। अस्मिन्नुपक्रमे स: वैष्णवसम्प्रदायस्य बिजोयकृष्णगोस्वामिन: अनुयायी बभूव।

बिपिनचन्द्र: अनुभवति स्म यत् ब्रह्मसमाजस्य बौद्धिकश्रद्धायां भक्ते: तेजस्वित्त्वं संयुक्तं भवेत्। बिजोयकृष्णगोस्वामिन: भक्तिस्वातन्त्र्यस्य मान्यतानुरूपं ब्रह्मसमाजेन सहापि स: सम्बन्धं स्थापयामास।

सुरेन्द्रनाथ बेनरजी

ई. स. १८७० तमस्य दशकं बंगप्रदेशे नवजागृतिं नवचेतनां चानिनाय। अस्मिन्समये बंकीमचन्द्रचटर्जीमहोदयस्य 'बंगदार शान' नामधेयसाहित्यिकप्रवृत्या: तथा सुरेन्द्रनाथबेनर्जीमहोदयस्य राष्ट्रियैक्यविचारै: आकर्षितोऽभवत्।

बिपिनचन्द्रस्य राष्ट्रवादिविचारधाराया: चिरस्थायिनिर्माणे सुरेन्द्रनाथ-बेनर्जीवर्यस्य महत्त्वमत्यधिकं वर्तते। ई. स. १८७० तमवर्षसमये आधुनिक यूरोपीयविचारै: फ्रेंचक्रान्तिविचारै: सह सम्पर्कं साधयित्वा स्वातन्त्र्यास्मिताया: सिद्धये फलप्रदां भूमिकां बेनर्जी न्यर्वहत्। बिपिनचन्द्रपालस्य पुनर्विवाह: अस्यैव सुरेन्द्रनाथस्य विधवाभागिनेय्या सहाभवत्।

अन्ये चिन्तका:

विशेषत: इटलीदेशे जोसेफमाझीद्वारा प्रवर्द्धिते 'यंग इटली' इत्यभिधेयान्दोलनस्य इतिहासात् सुरेन्द्रनाथबेनरजी अतिप्रभावित: जात:। भारत: अस्मात्प्रेरितो भवेदिति सोऽकामयत। जोसेफ-माझीवर्यस्य जीवनात् सुरेन्द्रनाथेन य: बोधपाठ अधिगत: तत: निश्चयेन बिपिनचन्द्रस्य विचारधारानिर्माणे महत्साहाय्यमभवत्।

इटलीदेशस्य जोसेफमाझीवर्यस्य जीवनात् श्रीसुरेन्द्रनाथ: प्रथमं बोधपाठं प्राप्तवान् यत्, नैतिकमाध्यात्मिकञ्च पुनर्सर्जनमेव राजकीयप्रगते: मूले स्थापयितुं शक्यते, इत्थं राजनीतौ नीतेरध्यात्मस्य च महत्त्वं स्वीकृतम्। द्वितीय: बोधपाठ: अयमासीत् यत् देशस्य नागरिक: राष्ट्रियभावनया समन्वितो भवेत् एतस्या: देशे भृशमावश्यकताऽस्ति। सुरेन्द्रनाथस्य इमे राष्ट्रियताविषयका नवविचारा अन्तिमा आसन्, येषां प्रभाव: बिपिनचन्द्रपाले नूनमेवाभवत्। यदा जन: कमपि आदर्शभूतं जनं मन्यते तस्य जनस्य विचारधारां स: स्वीकरोत्येव। नेतृत्वस्य व्याख्यायामिमानि तत्त्वानि मूले भवन्ति। नेतृत्वस्य अर्थ: अयमेव यत् अपरान् स्वव्यवहारेण प्रभावितुं सामर्थ्यम्।

सामाजिकोन्नतिसन्दर्भे बिपिनचन्द्रपाले येषां पाश्चात्यचिन्तकानां विचारैः प्रभावः कृतः तेषु -जे. एस. मील, डी. टोक्युविले तथा सिड्ग्विक प्रभृतयः प्रमुखा आसन्। अस्य सारः अयमस्ति यत् धर्म-तत्त्वज्ञान-सामाजिकनीतिः तथा राजनीतिः इमे सर्वेऽपि विषयाः परस्परमन्योन्याश्रिताः सन्ति, पृथक् पृथगेतेषामाकलनं कर्तुं न शक्यते। एतैः सर्वैः जनैः श्रीपालः प्रभावितः जातः।

हिन्दु-तत्त्वज्ञानम्

बिपिनचन्द्रपालः हिन्दुतत्त्वज्ञानेन अत्यन्तं प्रभावितः आसीत्। एषः यदा प्रथमवारम् इंग्लैण्डदेशं गतवान् तदा अनेन हिन्दुतत्त्वज्ञानस्य क्षमाभावनायाः शिक्षानीतेश्च बहुविधा प्रशंसा कृताऽसीत्। **'क्षमा वीरस्य भूषणम्'** क्षमा सद्गुणोऽस्ति। भवान् समक्षं स्थितं जनं शमयितुमर्होऽस्ति तथाऽपि तं न शमयति पीडयति साक्षमा कथ्यते। क्षमावृत्तेः विकासे समक्षं स्थितस्य जनस्य दोषान् विस्मर्तुं भवति योग्यताऽपेक्षते। **'विस्मरन्तु क्षमां च कुर्वन्तु'** इति सूत्रमाचरितुं जने मानवं प्रति उच्चप्रेमभावनाऽपेक्षते।

ब्रह्मसमाजः उत वा वैष्णवसमाजः उत वा अन्यसम्प्रदायः स्यात् परं तस्य विचारधारा हिन्दुतत्त्वज्ञानस्य मूलादृते न संस्थाप्यते।

'ब्रह्म सत्यं जगन्मिथ्या' इति सिद्धान्तप्रदातुः जगद्गुरुशंकराचार्यस्य विचारधारानुसारं यदिदं किमपि दृश्यते तत्सर्वं ब्रह्मैव। एतं सिद्धान्तं स्वीकृत्य कथं केनापि सह केनापि प्रकारेण भेदभावः स्थापयितुं शक्यते ? **'पण्डिताः समदर्शिनः'** इति न्यायेन सर्वेऽपि समानास्सन्ति तथाऽपि समेऽपि समवर्तिनः न भवन्ति। मातरि पत्न्यां चैकस्यैवात्मनः दर्शनेऽपि साधकः मातुः चरणारविन्दं स्पृशति किन्तु भार्यायाः चरणौ न स्पृशति। एतादृग्भेदतु मानवः स्वशरीरस्यावयवेषु अपि स्थापयत्येव।

हिन्दुधर्मे याः काश्चन त्रुटयः अवलोकितास्ताः हिन्दुविचारधारायाः नासन् परन्तु कैश्चन स्वार्थिभिः कर्मकाण्डिभिस्तथा धर्मध्वजधारिभिः समुत्पादितास्त्रुटयः आसन्। अभेदमद्वैतत्त्वञ्च मन्यमानैः मानवैः अत्र हिन्दुतत्त्वज्ञाने एताः त्रुटयः कथं स्वीकर्तुं शक्यन्ते ?

हिन्दुधर्मः

हिन्दुधर्मं प्रशंसन् श्रीबिपिनचन्द्रपालः कथयामास-हिन्दुधर्मः ख्रिस्तीधर्मसदृशः, मुस्लिमधर्मसदृशः अथवा बौद्धधर्मसदृशः एकः नास्ति एषः तु विविधसम्प्रदायानां विविधसंस्कृतीनाञ्च सुभगसमन्वयः वर्तते। **'विविधतायां एकता, हिन्दूनां विशेषता'**

इति श्रुतिः जनप्रसिद्धैव। विशेषेण हिन्दुधर्मस्य स्थापकः न कश्चिज्जनः वर्तते, न चायं धर्मः केवलमेकमेव ग्रन्थमाश्रयते।

हिन्दुधर्मे लोकतन्त्रं यथा स्वीक्रियते न तथा अन्यस्मिन् कस्मिंश्चिद्धर्मे। व्यक्तेः स्वतन्त्ररूपेण विचाराधिकारं हिन्दुधर्मः नावरुणद्धि। त्रयस्त्रिंशत्कोटिदेवानां कल्पना एतस्य स्वातन्त्र्याधिकारस्य अद्भुता कल्पना। 'हिन्दु' शब्दस्य व्यत्पत्तिं कुर्वन् प. पू. रंगावधूतः कथयति- 'हीनेन दूयते इति हिन्दुः' यस्य मनः हीनेन कार्येण दुःखमनुभवति सः हिन्दुरित्युच्यते। एक एव ईश्वरः, एक एव धर्मग्रन्थः अथवा एक एव गुरुः अत्र न स्वीक्रियते यस्मै यदनुकुलं यद् वा रोचते तथा सः गुरुं धर्मग्रन्थं तथेश्वरं स्वीकर्तुं शक्नोति एतादृशः अवकाशः हिन्दुधर्मे एवावलोक्यते। 'मानवतायाः पराकाष्ठा अर्थात् देवत्वस्यानुभूतिः, परमात्मनः साक्षात्कारः' इत्येव हिन्दुधर्मस्य तत्त्वज्ञानमस्ति।

स्वामितन्त्रेश्वरानन्दमहाराजः निरूक्तानुरूपं हिन्दुधर्मं व्याचरव्यन् उवाच - 'हिन्दुशब्दे त्रयः वर्णास्सन्ति हिंस् - नम् - दु च। यः निर्भयः भवेत्, अन्यायिनं दण्डयितुमुत्साहितो भवेत्, विनम्रो भवेत्, यश्च दानशीलश्च भवेत् स एव हिन्दुरुच्यते।

*

प्रकरणम् - ५

।। विदेश - यात्रा ।।

'प्रवासः श्रेष्ठशिक्षकः भवति' इति न्यायेन देश-विदेशे यः भ्रमति स बहु किमपि शिक्षितुं ज्ञातुञ्चावसरं प्राप्नोति। अत एव अस्माकं संस्कृतौ देशाटनस्यात्यन्तं महत्त्वं निगद्यते। बिपिनचन्द्रपालः न केवलं देशभक्तः, अपि तु गहनचिन्तक आसीत्। यत्रापि किमपि शोभनं पश्यति स्म ततः सारं गृहीत्वा स्वीकरोति स्म, यत्र च किमप्यसमीचीनं पश्यति स्म तत्र सत्यस्थापनायै प्रयासं करोति स्म एतदेव महापुरुषस्य लक्षणं भवति। भगवतः दत्तात्रेयस्य चतुर्विंशतिगुरूणां कथा अनया दृष्ट्यैवावलोकनीयाऽस्माभिः।

इंग्लैण्डदेशस्य प्रथमप्रवासः

सर्वप्रथमं चत्वारिंशत्तमवर्षीये वयसि १८९८ तमे ईसवीयाब्दे बिपिनचन्द्रः इंग्लैण्डदेशं गतः। 'विदेशं यः गच्छति स प्रायश्चित्तं करोति, अपवित्रो भवति' इति रुढिगतविचारधारां स न स्वीकरोति स्म।

पालः इंग्लैण्डदेशं गतः तस्य कारणम् 'ओक्सफोर्ड' विश्वविद्यालये 'तुलनात्मकचिन्तनधारायाः अभ्यासः' इत्यासीत्। सामान्येनायं पाठ्यक्रमः वर्षद्वयस्य भवति अतः वर्षद्वयं इंग्लैण्डदेशे अभ्यासाय निवासः करणीयः आसीत। परन्तु बिपिनचन्द्रस्य बुद्धिकौशल्येन, चातुर्येण, प्रगत्या च महाविद्यालयस्य प्रधानाचार्यः एतावत् आश्चर्यचकितः जातः यदेकस्मिन् वर्षे पूर्णे जाते एव अभ्यासपूर्तेः तस्मै प्रमाणपत्रं प्रदत्तम्। भारते महाविद्यालयस्य प्रथमवर्षे वर्षद्वयं यापयिता बिपिनः वर्षद्वयस्य अभ्यासक्रममेकस्मिन् वर्षे एव पूर्णं कृतवान्। परिणामेन स अतिरिक्तसमयस्योपयोगं इंग्लैण्डामेरिकयोः विशाल-प्रवासायाकरोत्। एतस्मिन् प्रवासे सः अनेकविधस्थलेषु समभाव-अद्वैत-ब्रह्मज्ञान-हिन्दुधर्म -हिन्दुराजनीत्यादिविषयानाधारीकृत्य प्रवचनानि कृतवान्। भारतवर्षस्य च बौद्धिकप्रतिभायाः तथा आध्यात्मिकमहत्तायाः अनेन माध्यमेन परिचयं कारितवान्॥

अस्मिन् प्रवासे स आंग्लसामयिकेषु लेखान् लिखित्वा प्रवचनानि च कृत्वा निजप्रवासव्ययं निःसारितवान्। वाचनवृत्तेः चिन्तनवृतेश्च कारणेनैवेदं कार्यं शक्यमभवत्।

यदा ई. स. १९०० तमे वर्षे सः भारतं प्रत्यावर्तितवान् तदा पाश्चात्त्यदेशानां पाथेयं

नीत्वा आगतवान्। गुणग्राहिणा पालेन पाश्चात्त्यसंस्कृतेः शोभनानि तत्त्वानि स्वीकृत्य आचरणे आनेतुं प्रयत्नः कृतः। विदेशादागत्य सत्वरमेव सः 'न्यू इन्डिया' नामधेयं सामयिकं प्रकाशितवान् सप्तवर्षाणि यावच्च तन्त्रिपदमलङ्कृतवान्।

इंग्लैण्डदेशस्य द्वितीयप्रवासः

इंग्लैण्डदेशस्य प्रवासानन्तरं पुनः अष्टवर्षाणि भारते स्थित्वा बिपिनचन्द्रपालः १९०८ तमे वर्षे अगस्तमासे द्वितीयवारम् इंग्लैण्डदेशं गतः। सः तत्र त्रीणि वर्षाणि स्थित्वा समयस्य सदुपयोगं कृतवान्।

अस्मिन् प्रवासे सः लंदननगरे 'स्वराज' नामधेयं पाक्षिकं सामयिकं प्रारब्धवान्। तेन हिन्दुदेशस्य स्वायत्ततायाः विचारधारा अनेन पाक्षिकेन प्रस्तुता। तस्य लेखैः जनाः अतिप्रभाविताः जाताः। विशेषेण श्रमजीविनः, भारतं प्रति सहानुभूतिं स्थापतितारः तथा जनतन्त्रस्य समर्थकाः नेतारः प्रभाविताः अभवन्। एतेषु श्रीपालः लोकप्रियः तथा आदर्शमानवरूपेण प्रसिद्धिमवाप।

इंग्लैण्डदेशस्य प्रवासे त्रिषु वर्षेषु सः यदवलोकितवान् यच्चानुभूतवान् तत्परिणामतः तस्य राजकीयविचारेषु महत्त्परिवर्तनमागतम्। निरपेक्षस्य एकाकिनश्च भारतस्य स्थाने सः ब्रिटिशसाम्राज्ये समानसहभागितायाः आदर्शं प्रास्तौत्। स्वराजनामधेये पाक्षिके लिखितेन लेखेन स अतिप्रसिद्धोऽभवत्। तेन सूचितानां सूचनानां डब्ल्यु. टी. स्टेडमहोदयः स्वागतं कृतवान् परन्तु ब्रिटिशसर्वकारः अनेन अप्रसन्नः जातः। एतादृशैः लेखैः इंग्लैण्डदेशे यथा प्रभावः जातः तं दृष्ट्वा सर्वकाराय भारते राज्यसञ्चालनं दुष्करं भवितुं शक्यते स्म।

यदा इंग्लैण्डदेशात् कलकत्तामागन्तुं मुंबईपत्तनं प्राप्तस्तदैव उत्तेजकलेखानां लेखनैः प्रवचनैः च सर्वकारेण एकमासस्य कृते कारागारे निक्षिप्तः। स्वराजपाक्षिके लिखितलेखेभ्यः सः अभियुक्तं मत्त्वा मुंबईकारावासे स्थापितः। **'न प्राणान्ते प्रकृतिविकृतिर्जायते ह्युत्तमानाम्'** इति न्यायेन श्रीबिपिनः किञ्चिन्मात्रमपि भयभीतः नाभवत्।

एकमासं कारावासे दण्डरूपेण स्थित्वा सः कलकत्तानगरं गतः। तत्र गत्वैव सः 'हिन्दु रिव्यु' नामधेयं मासिकं सामयिकं प्रकाशितवान्। परन्तु दुर्भाग्यवशात्तत्सामयिकं मध्ये एव अवरुद्धं सञ्जातम्।

इंग्लैण्डदेशस्य तृतीयप्रवासः

बिपिनचन्द्रपालस्य तृतीयः प्रवासः हिन्ददेशस्य प्रतिनिधिरूपेण आसीत्। १९१९ ईसवीयवर्षस्य अप्रैलमासस्य त्रयोदशदिनाङ्कः भारतस्य राजनीतेः दुर्दिनमासीत्।

'रोलेट एक्ट' इत्यस्य विरोधे सम्पूर्णदेशे जनान्दोलनान्यभवन्। एतान्यान्दोलनानि शनैः शनैः जनजागृतेर्कारणान्यभवन्। रोलेट एक्टविरोधे पंचनदप्रदेशः अशान्तेः केन्द्रस्थलमभवत्। एतदशान्तिपूर्णं वातावरणं नियन्त्रयितुं ब्रिटिशसर्वकारः एकां योजनां निर्मितवान्।

पंचनदप्रदेशस्य अमृतसरनगरे स्थिते जलियावालाबागमध्ये सर्वकारनीतेः विरोधाय १३ अप्रेल १९१९ तमे वर्षे एका सभाऽयोजिताऽभवत्। सभायामस्यां विंशतिसहस्राधिकाः जनाः एकत्रीभूताः अभूवन्। पुरुषैः स्त्रीभिः बालकैश्च एतत्स्थलं प्रपूरितमासीत्। अस्यां सभायां पंचनदप्रदेशस्य लेफ्टिनन्ट-गर्वनर-जनरल डायरः अत्याचारं कृतवान्। निजसेनिकैः सह गत्वा सः भुशुण्डिप्रहारैः भयङ्करं हत्याकाण्डं कृतवान्। सम्पूर्णदेशे हाहाकारोऽभवत्। विरोधज्वालया सम्पूर्णदेशः प्रज्वलितो जातः। एतस्य हत्याकाण्डस्य सत्यवार्तां सविवरणं ज्ञापयितुं इंग्लैण्डदेशं भारतात् प्रतिनिधिमण्डलमगच्छत्। एतस्य प्रतिनिधिमण्डलस्य सभ्यत्वेन श्रीबिपिनचन्द्रपाल आसीत्।

हिन्दीराष्ट्रियमहासभया लोर्ड सेल्सबोर्नवर्यस्य अध्यक्षत्वे रचितायाः संयुक्तसंसदीयसमितेः समक्षं प्रस्तुतीकरणाय प्रतिनिधिमण्डलं प्रेषयित्वा हत्याकाण्डस्य विवरणं ज्ञातुं निश्चयः कृतः।

१९१९ ईसवीयवर्षस्य अगस्तमासे सः इंग्लैण्डदेशं गन्तुं प्रस्थितस्तदा प्रथमविश्वयुद्धं प्रारब्धमभवत्। अस्मिन् प्रवासे सः प्रथमविश्वयुद्धात् रशियादेशस्य बोल्शेविकक्रान्तेः च प्रभावितोऽभवत्।

इंग्लैण्डदेशस्य अनेन प्रवासत्रयेण सः पाश्चात्त्यविचारैः परिचितोऽभवत्। एतस्य अनुभवस्य उपयोगं स स्वातन्त्र्यप्राप्तये अकरोत्।

*

प्रकरणम् - ६

॥ राष्ट्रवादः राजनीतिश्च ॥

बहुश्रुतः गम्भीरविचारकश्च बिपिनचन्द्रपालः भवतु नाम नाम्ना शिक्षकः; परन्तु तस्य हृदि देशभक्तिभावना तु उत्कटाऽसीत्। बिपिनचन्द्रे मातृभूमिं प्रति स्नेहः, देशस्वतन्त्रतायै उत्साहः, सत्यविचारधारायाः समर्थनं तथा अन्यायस्य विरोधादयः गुणाः आबाल्यादेवासन्।

एतन्मध्ये एवमभवत् यत् कालीचरण-बेनर्जी खिस्तीधर्मस्य प्रशंसां कुर्वन् ब्रह्मसमाजं च निन्दन् प्रवचनानि दत्तवान्। खिस्तीधर्मस्य प्रशंसायाः जनः विरोधं न कुर्यात् परन्तु ब्रह्मसमाजस्य निन्दां कथं सहेत ? सत्यपूजकः बिपिनचन्द्रपालः ब्रह्मसमाजस्य पक्षे षट्प्रवचनानां पङ्क्तिं निर्मितवान्। एतस्य भाषणानि विद्वत्त्वयुक्तानि, तार्किकानि, सत्यवार्ताभिः पूरितान्यासन्। एतदाकर्ण्य जनाः स्तब्धाः जाताः। सुन्दरवाक्छटया विद्वत्तापूर्णप्रवचनैः जनानां हृदि मस्तिष्के च एषः स्थानं प्राप्तवान्। परिणामतः धार्मिकसुधारणायाः प्रखरवक्तृरूपेण स्थापितः अभवत्। पुनश्च तेन राजनीतौ प्रवेशः कृतः।

महासभायां श्रीपालः

बिपिनचन्द्रस्य हिन्दीराष्ट्रियमहासभया सह सम्बन्धः कांग्रेस-पक्षस्य द्वितीयाधिवेशनतः अर्थात् १८८६ ईसवीयवर्षात् अभवत्। हिन्दीराष्ट्रियमहासभायाः स्थापना १८८५ ईसवीयवर्षे जाताऽसीत्। कांग्रेसस्य द्वितीयाधिवेशने सः सिलहटस्य प्रतिनिधिरूपेण भागमगृह्णात्। ततः सन् १८८८, १८८९, १८९६, १८९७ तमेषु वर्षेषु महासभाया अधिवेशनेषु भागं गृहीत्वा तत्र स्वमन्तव्यानि प्रभावकरुपेण प्रास्तौत्।

ई. स. १८९१ तमे वर्षे विवाह सम्मतेः कृते उचित/मान्य वयसः नियमानां विरोधे प्रचण्डं जनान्दोलनं प्रारब्धम्। अस्मिन् नियमे विवाहयोग्यमायुः द्वादशवर्षाणि कृतं तदा रुढिगतहिन्दुभिः 'हिन्दुधर्मः सङ्कटे वर्तते' इति हाहाकारः कृतः। स्वयं लोकमान्यतिलकः एतस्य विरोधं कृत्वा कथयामास यत् हिन्दुधर्मस्य मान्यतासु रीतिषु च एतादृशः हस्तक्षेपः न स्वीकरिष्यते। परन्तु बिपिनचन्द्रपालः विरोधेषु सत्स्वपि एतस्य नियमस्य समर्थनं कृतवान्। सः एतं नियमं योग्यं, कन्यानां हितरक्षकञ्च मत्वा एतस्य समर्थनमकरोत्।

बंगप्रदेशस्य विभाजनम् एवं बिपिनचन्द्रपालस्य राष्ट्रवादः इत्यनयोः प्रभावेण सकले भारते बंगप्रदेशस्य प्रजा अतिशिक्षिता, क्रान्तकारिविचारैः परिपूर्णा मन्यते स्म। ब्रिटिशसर्वकारः सदैव

एतेभ्य: विभेति स्म। शिक्षित: न कदाप्यन्यायं सहते। पुनश्च स: स्वकर्तव्यानि अधिकारांश्च सम्यग्वेत्ति। अत: बंगप्रदशविषये सर्वकार: सदैव जागृत: भवति स्म।

बंगलस्य हिन्दूनां जागृति: भारतस्य स्वतन्त्रतायै महत्त्वपूर्णं भागं धत्ते इति सर्वकार: जानाति स्म: अत: तत्रत्य: वाइसरॉय-लोर्ड-कर्जन व्यवस्थापनस्य सरलताव्याजेन बंगलप्रदेशं द्विधा विभक्तुं निश्चयं कृतवान्। एतद्भागद्वयं चांतुर्येण तेन तथा विभक्तं यथा पूर्वबंगाले मुस्लिमजनानां बहुसङ्ख्या भवेदत: न हिन्दूनां जागृति: नियन्त्रिता भवेत्। 'विभागं कुर्वन्तु राज्यं शासतु' इति नीतौ निपुणेन कर्जनेन बंगालप्रदेश: द्विधा विभक्त:।

बंगालस्य विभागस्य नियम: ई. स. १९०५ तमे वर्षे निर्मित:। एतस्य विरोधे 'बंगभंग' इत्यभिधेयमान्दोलनं जातम्। सम्पूर्णदेशस्य प्रजा अस्मिन्नान्दोलने संयुक्ता जाता यस्मात् एतस्य रूपान्तरणं स्वदेशीआन्दोलनरूपेण जातम्।

तस्मिन्काले एव १९०५ तमे वर्षे लघुकायेन जापानदेशेन रशियादेश: पराजित:। एतदवलोक्य देशस्य प्रजाया: आत्मविश्वास: वृद्धिं प्राप्त:। हिन्दुजनैरनुभूतं यत् ते जागृता: संगठिताश्च भवन्ति चेत् ब्रिटिशसर्वकारं पराजित्य स्वतन्त्रा: भवितुं शक्नुवन्ति।

बंगभङ्गस्य अनेनान्दोलनेन बिपिनचन्द्रस्य राजनीते: सर्वाणि द्वाराणि उद्घटितान्यभवन्। बंगालस्य विभागीकरणस्य सर्वकारयोजनाया: दुर्वृत्तिं ज्ञात्वा बिपिनचन्द्रस्य राजनीतिविचारेषु महत्त्परिवर्तनमभवत्। स: एवमन्वभवत् यत् ब्रिटिशसाम्राज्यं प्रति १९०२ तमवर्षं यावत् प्रदर्शितस्य विश्वासस्य न कश्चिदर्थ: वर्तते। स: अनया घटनया अतीवविषण्ण: सन् विश्वासघातभावनया पीडित इवाभवत्।

लाल-बाल-पालत्रितयम्

ब्रिटिशसर्वकारं प्रति प्रदर्शित: नम्रताभाव: दौर्बल्यमस्ति, विश्वासभावश्च मूर्खत्वमस्ति इति जना: मन्यन्ते। अत एतस्य ब्रिटिशसर्वकारस्य विरोधं विहाय नान्य: पन्था: इति स: ज्ञातवान्। 'शठे शाठ्यं समाचरेत्' इति भणित्यनुसारं सर्वेऽपि उग्रा अभवन्। परिणामत: लोकमान्यबालगंगाधरतिलक: (बाल:) लाला लाजपतराय: (लाल) इव बिपिनचन्द्रपालोऽपि (पाल:) अन्तिमवादी उग्रतावादी सञ्जात:। इत्थं लाल-बाल-पालत्रितयं लोकविश्रुतमभवत्। उग्रवादिविचारसरणे: स्वीकृतेरनन्तरं श्रीपाल: 'भिक्षुकवृत्ति: न' परन्तु 'स्वराज्यम्', 'स्वदेशी', 'बहिष्कार:' तथा राष्ट्रियशिक्षणस्य शङ्खनादं चकार।

लोकमान्यतिलकोऽपि 'स्वराज्यं मम जन्मसिद्धाधिकारः तत् प्राप्यैव विरंस्ये' इति सूत्रं दत्त्वा स्वराज्याधिकारर्थं प्रारानायाः अथवा भिक्षायाः आवश्यकता न भवति परन्तु तत्प्राप्तये बलपूर्वकमाहरणं कर्तव्यं भवति इत्युवाच। क्रान्तिकारिविचारधारया समन्वितः बिपिनचन्द्रपालः एतत्तथ्यं सम्यग्रूपेण ज्ञातवान्।

ई. स. १९०६ तमे वर्षे श्रीपालः 'वन्दे मातरम्' नामधेयमांग्लीयं वर्तमानपत्रं प्रकाशयामास एतादृग्वर्तमानपत्रम् आन्दोलनाय साहाय्यरूपं भवति। यत्कार्यं खड्गेन न भवति तत्कार्यं लेखन्या भवितुं शक्नोति। आन्दोलनस्य सम्पूर्णविवरणं दत्त्वा एतानि वर्तमानपत्राणि लोकजागृतेरपूर्वं कार्यं कुर्वन्ति। लोकमान्यतिलकस्य 'केसरी' नामकं वर्तमानपत्रं तथा 'मराठा' नामकं साप्ताहिकं पत्रं लाकजागृतेः कृते महत्त्वपूर्णयोगदानं अयच्छताम्। एतादृगेव कार्यं श्रीपालः वर्तमानपत्रमाध्यमेन कृतवान्।

ई. स. १९०६ तमे वर्षे कांग्रेसपक्षेण 'बहिष्कार'- 'स्वदेशी' - 'स्वराज' 'राष्ट्रियशिक्षण' इत्यादीनां समर्थननियमाः पारिताः। भारतस्य राजकीयप्रगतौ एतन्महत्त्वपूर्णं सीमाचिह्नम् आसीत्। बिपिनचन्द्रपालः बंगालेतरप्रदेशानां प्रवासं कृत्वा ब्रिटिशसर्वकारस्य अनेन माध्यमेन विरोधं कृतवान्।

बिपिनचन्द्रपालः अभ्यासी विचारकः श्रेष्ठवक्ता चासीत्। अस्मिन्नैवोपक्रमे २,७ मई १९०७ तमे वर्षे तेन मद्रासनगरे प्रवचनानि प्रदत्तानि। तस्यैमैतिहासिकभाषणैः तत्रेतिहासः विरचितः। स्वराजविषये दादाभाई नवरोजी द्वारा प्रदत्तोपायस्य अनेन विरोधः अस्वीकारश्च कृतः। दादाभाई नवरोजी 'उदारदलस्य समर्थकः आसीत्।'

अरविन्दघोषस्य उपरि आरोपः कारावासश्च

तस्मिन्काले क्रान्तिकारिणः युवकाः बंगप्रदेशे बहवो अभवन्। तेषु अरविन्दघोषः अपि एकतम आसीत्। तस्य प्रवचनै जनः देशं प्रति कायेन मनसा वित्तेन च समर्पितो भवितुं प्रेरणां प्राप्नोति स्म। ब्रिटीशसर्वकारः तस्य प्रवचनानि उत्तेजकानि गणयति स्म।

ई. स. १९०७ तमे वर्षे उत्तेजकभाषणानां निमित्तेन अरविन्दघोषे आरोपः स्थापितः। न्यायालये न्यायिकप्रक्रियायै महत्त्वपूर्णसाक्षिरूपेण बिपिनचन्द्रपालः आहूतः, परन्तु श्रीपालः न्यायालयादेशस्य अवहेलनां कृत्वा तत्र न गतः। बिपिनचन्द्रः कथयामास यत् अयमारोपः देशस्य विरोधे वर्तते अतः देशभक्तरूपेण न्यायालये उपस्थितिरयोग्या। न्यायालयस्य तिरस्कारात् षण्मासानां कारावासदण्डं श्रीपालः प्राप्नोत्।

प्रेसीडेन्सीकारावासे षण्मासान् स्थित्वा ९ मार्च १९०८ तमे वर्षे सः बहिरागतः. तदा जना अतीवानन्दिता अभूवन्। अयं दिवसः बंगाल-मद्रास-दक्षिणभारते च जनैः 'आनन्दमयदिवसरूपेण' उद्यापितः। घटनेयं बिपिनचन्द्रपालस्य लोकप्रियत्वं सूचयति।

'होमरूल' आन्दोलनं बिपिनचन्द्रपालश्च

ई. स. १९४४ तमे वर्षे भारतवर्षस्य स्वतन्त्रतान्दोलने एकं नवं प्रकरणं प्रारब्धमभवत्। मांडलेकारावासे स्थित्वा लोकमान्यतिलकः स्वदेशं प्राप्तस्तदा आयर्लेन्डदेशस्य महिलया 'श्रीमतीएनीबेसन्ट' वर्यया भारतीय राजनीतौ प्रवेशः कृतः। उभाभ्यां मिलित्वा 'होमरूल' आन्दोलनमाध्यमेन देशे क्रान्तिः समुत्पादिता।

'होमरूल' आन्दोलनस्योद्देश्यं स्थानिकसंस्थासु धारासभासु च जनचयनितप्रतिनिधिभिः व्यवस्थापनमासीत्। एतद्ध्येयं संविधानपद्धत्या शान्त्या च साधनीयमासीत्। बिपिनचन्द्रोऽपि अस्मिन्नान्दोलने संयुक्तोऽभवत्।

ई. स. १९१६ तमे वर्षे हिन्दीराष्ट्रियमहासभायां क्रान्तिकारिविचारधारायुतैः नेतृभिः पुनः प्रवेशः कृतस्तदा राजकीयपरिस्थितौ महत्परिवर्तनमभवत्। लोकमान्यतिलकस्य बिपिनचन्द्रपालस्य च विचाराः समानाः आसन्नतः उभयोः मध्ये साम्मनस्यं सम्यगासीत्।

इत्थं जन्मनैव पत्रकारः, लेखकः, वक्ता, विचारकश्च श्रीबिपिनचन्द्रपालः क्रान्तिकारिविचारधारया, भाषणैः, लेखैश्च जनेषु स्वातन्त्र्यज्योतिं प्रकटयामास। तस्मिन्काले स्वातन्त्र्यप्राप्तेः कृते जनजागृतेः महती आवश्यकता आसीत्। बिपिनचन्द्रपालः एतन्महत्त्वपूर्णं कार्यं सम्यग्रूपेण न्यवहत्।

*

प्रकरणम् -७

।। पत्रकारः लेखकश्च ।।

बिपिनचन्द्रपालः जन्मनैव पत्रकारः अवर्तत। पत्रकारत्वं सहजतया तस्य स्वभावे आसीत्। कस्मिन्नपि सामयिके सः कामप्यपेक्षां विना लेखान् लिलेख। स्वाभिमानैकधनः स्वतन्त्रविचारधारासमन्वितः श्रीपालः उत्तेजकविचारान् सभ्यतया नम्रभावेन च प्रकटयामास।

'आलोचना' - 'वन्दे मातरम्' - 'पारदर्शक' - 'बेंगाल पब्लिक' - 'ओपीनियन' - 'ट्रिब्यून'- 'आशा' - 'कौमुदी'-'न्यु इन्डिया' सदृशेषु आंग्लभाषायां बंगालीभाषायां च प्रसिद्धेषु सामयिकेषु तन्त्रिरूपेण कार्यभारं श्रीपालः जग्राह।

तन्त्रिपदस्य स्वीकरणं तच्च सम्यग्रूपेण प्रतिपादनमत्यन्तं दुरूहं भवति। तन्त्री सम्यग्वाचकः, विचारकः, विश्लेषकः, विवेचकश्च भवेत्। तन्त्रिपदे स्थित्वा लेखनीबलेन राज्यसत्तामपि कम्पयितुं शक्तो भवति। बिपिनचन्द्रस्य कार्यसाधनाकालः अतिदीर्घ आसीत्। ई.स. १८५८ तः ई. स. १९३२ वर्षपर्यन्तम् अर्थात् चतुःसप्ततिवर्षीय-सुदीर्घजीवनस्य पञ्चाशद्वर्षाणि सः राष्ट्रसेवायां यापयामास।

सामाजिकराजकीयोत्क्रान्तिसमये समाजे अन्यायप्रतिकारस्य यथार्थपरिस्थितिज्ञानस्य वातावरणमभवत्। अनेन वातावरणेन बिपिनचन्द्रस्य व्यवहारः, विचारधारा, व्यक्तित्वं च परिवर्तितम्।

'इन्डिपेन्डन्ट' पत्रस्य तन्त्री

ई.स. १९२० तमे वर्षे मोतीलालनेहरुद्वारा सञ्चालितस्य 'इन्डिपेन्डन्ट' पत्रस्य तन्त्रिपदं श्रीबिपिनचन्द्रपालः मासिकपञ्चशतरूप्यकैः अलञ्चकार। सः निजदृढ़मान्यतानां विचारधारायाश्च भोगेन किमपि न स्वीकरोति स्म। निजस्वतन्त्रतायाः बलिदानेन कार्यकरणस्य सज्ञता नासीत्, अतः महात्मगान्धिनः विरोधी बिपिनचन्द्रः 'इन्डिपेन्डन्ट' पत्रस्य तन्त्रिपदं तत्याज। यत्सत्यमासीत् तदेव जीवने तेन स्वीकृतम्। विचारे, व्यवहारे, वाण्यां च ऐक्यभावः तस्य जीवने आसीत्। यथार्थपत्रकारवत् स्वार्थसिद्धये सत्यतां निलीतुं तेन न कदापि प्रयासो विहितः। सः पत्रकाररूपेण सत्यसंरक्षणाय बलिवेदावपि प्राणान्त्यक्तुं सदैव सज्जोऽभवत्।

'हिन्ददेशस्य आत्मा' प्रभृतयः लेखाः, पुस्तकानि च

लेखकरूपेण बिपिनचन्द्रः ख्यातनामा आसीत्। सः बहुविधान् लेखान् लिलेख बहूनि प्रवचनानि च ददौ। तस्य लेखाः विद्वत्तापूर्णाः, अभ्याससभराः चिन्तनीयाश्चासन्। विविधसामयिकानां तन्त्रिपदं स्वीकृत्य तेन बहवः तन्त्रिलेखाः लिखिताः येषु देशस्य सामाजिक-धार्मिक-आर्थिक-राजकीयस्थितेः वास्तविकं चित्रणं भवति स्म। तस्य लेखस्याकारः लघुकायपुस्तिकेव भवति स्म।

'इन्डिया एन्ड धी अम्पायर', 'धी मेसेज ओफ इन्डियन हिस्ट्री', 'जवाबदार सरकार', 'होमरूल', 'नवी नीति', 'धी न्यू इकोनोमिक मिनेक इन्डिया', 'धी डेमोक्रेटिक स्वराज', 'धी ब्रह्मोसमाज एन्ड धी बेटल फोर स्वराज टु इन्डिया', 'बेझिझ ओफ पोलिटिकल रिफोर्म', 'धी पोजिटिव वेल्यु ओफ नेशनालिजम', 'इन्डियन नेशनालिजम हिन्दु स्टेन्ड-पोइन्ट', 'नेशनल बिल्डिंग' प्रभृतयः बहवः लेखाः तेन लिखिताः।

समाजोद्धारतः राजकीयपरिवर्तनपर्यन्तं सर्वेषु विषयेषु अद्वितीयं चिन्तनं लेखनञ्चावलोक्यते। प्रतिकारवृत्तिः तस्य रुधिरे आसीत् अतः तस्य विरोधवृत्तिं केचन जनाः निन्दन्ति स्म। तस्य चिन्तनमतीव गहनमासीदतः सर्वेऽपि तं सरलतया नावगच्छन्ति स्म।

'हिन्ददेशस्य आत्मा', 'पितृप्रेम्णः विजयः', 'लोर्ड रिपन तथा राजकीयजागृतिः', 'पञ्चाशद्वर्षपूर्वं मद्रास', 'अहं कथं ब्रह्मसमाजे संलग्नः' इत्यादयः लेखाः तेन लिखिताः। येषां माध्यमेन निजविचारधारा अन्यविषयाश्च अर्थपूर्णरूपेण जनानां पुरतः तेन प्रस्थापिता।

केचन जनाः तादृशाः भवन्ति यं तत्कालीनसमाजः नावगच्छति। श्रीबिपिनचन्द्रपालः तादृश एव जन आसीत्।

*

प्रकरणम् - ८

॥ हिन्दी राष्ट्रवादः ॥

ई.स. १९०२ तमवर्षस्य नवराष्ट्रवादान्दोलने बिपिनचन्द्रपालः अग्रणीः नेता बभूव। जनानामन्तःकरणे निहितराज्यविषये बिपिनचन्द्रः गहनं चिन्तनं चकार। एतच्चिन्तनं नागरिकत्वस्य मूलभूततत्त्वं पस्पर्श।

पालस्य मतानुसारं राष्ट्रवादस्य अन्तिमार्थः भारतस्य प्रजायाः ब्रिटिशशासनात् राजकीयस्वतन्त्रताप्राप्तिरेवासीत्। बिपिनचन्द्रपालः अनेनान्दोलनेन सर्वेषु क्षेत्रेषु मुक्तरूपेण हिन्ददेशस्य स्थापनां कर्तुं वाञ्छति स्म।

सामाजिक-आर्थिक-सांस्कृतिक-राजकीयरीत्या समृद्धेऽस्मिन् भारते हिन्दु-मुस्लिम-ख्रिस्ती-अन्यधर्मावलम्बिनश्च सम्यञ्चः सव्रताश्च भूत्वा तिष्ठेयुरिति पालस्य राष्ट्रवादविचार आसीत्। इत्थं वचसा व्यवहारेण स यथार्थराष्ट्रवाद्यासीत्। सः हिन्ददेशस्य राष्ट्रवादान्दोलनाय नवतात्त्विकविचारधारां प्रायच्छत्, येनेमां विचारधारां 'राष्ट्रवाद' नाम्ना वयं जानीमः।

राष्ट्रियताया अर्थः

बिपिनचन्द्रपालस्य राष्ट्रियतायाः व्याख्यायां स्पष्टरूपेण इटालियननेतुः जोसेफ माझीवर्यस्य प्रभावः दृश्यते। परन्तु कुत्रचित् तस्मात् वैभिन्यमपि अवलोक्यते। इत्थं सः कस्यापि प्रभावे आगतः सन्नपि स्वतन्त्ररूपेण विचार्य, शब्दस्य व्याख्यां कृतवान्। श्रीपालस्य मते- 'राष्ट्रियता प्रजायाः विशिष्टं व्यक्तित्वमस्ति'। अयं विचारः जोसेफ माझीतः भिन्नः दृश्यते।

यूरोपदेशस्य जनानां व्यक्तित्वविचारः बिपिनचन्द्रस्य विशिष्टव्यक्तित्वाद् भिन्नः संकुचितश्च दृश्यते। बिपिनचन्द्रस्य मते यूरोपीयजनाः राष्ट्रियतासन्दर्भे व्यक्तित्वस्य यां व्याख्यां कुर्वन्ति तत्र एकलता सङ्घर्षश्चानिवार्यो भवति, यतः तत्र केवलम् अधिकारः एव चिन्त्यते। यदा भारतीयसंस्कृतौ राष्ट्रियतामाध्यमेन विशिष्टव्यक्तित्वं विचार्यते यत्र मानवः उच्चपथि अग्रेसरो भवति तथा तस्य सम्पूर्णजगता सह ऐक्यभावः स्थापितो भवति। एषा उच्चभूमिकायुक्ताऽदर्शस्थितिरस्ति यत्र मानवे जातेः वर्णस्य न कश्चिद् नियमः नियन्त्रणं च विचार्यते। इत्थं बिपिनचन्द्रस्य राष्ट्रियताविचारे निहितः विशिष्टव्यक्तित्वविचारः एकलताभावात् सङ्घर्षाच्च रहितः अस्ति। व्यक्तित्वे दृश्यमानं वैभिन्यं सामाजिकैक्यभावनां कथञ्चिदपि हानिं न प्रापयति उत वा न नाशयति।

बिपिनचन्द्रः कथयति - "I would therefore describe nationality, rether as Individuality."

राष्ट्रविचारः

बिपिनचन्द्रपालस्य मतानुसारं राष्ट्रं केवलं शब्दः, भावना अथवा विचारः नास्ति। राष्ट्रं तु स्पृश्यमाणं मूर्त वस्तु वर्तते, भावनया राष्ट्रशब्दः अवगम्यते।

'राष्ट्रं' शब्दोऽपि, विचारोऽपि चिह्नमपि वर्तते। देशाय बलिदानं दत्तवन्तः पुरुषाः स्थलानि च राष्ट्रस्य मूर्तस्वरूपाणि सन्ति। अस्य मतानुसारं राष्ट्रं;व्यक्तेः व्यक्तित्वस्य विशालं विस्तृतञ्च स्वरूपं भवति। राष्ट्रं विराट्पुरुषस्य बाह्यस्वरूपं वर्तते। अतः पालः स्वात्मानं विकासयितुं त्यागस्य बलिदानस्य चावश्यकतां महत्त्वञ्च स्वीकुर्वन् 'वन्दे मातरम्' पत्रे लिखिते लेखे निजगाद -"राष्ट्रे निवसतां जनानां मध्ये सेन्द्रियसम्बन्धः वर्तते। ते अन्योन्याश्रिताः भूत्वा परस्परं पोषयन्ति न तु शोषयन्ति।"

यथाऽस्माकं शरीरं नानाविधावयवैः निर्मितमस्ति, इमान्यङ्गानि परस्परमाधारितानि पूरकानि च सन्ति तथा राष्ट्रे निवसन्तः जना अपि परस्परमाश्रिताः पूरकाश्च भवन्ति। राष्ट्रस्य हितेन सह मानवस्य स्वीयं हितं भवति। देशस्य प्रजाः राष्ट्रस्य विविधान्यङ्गानि सन्ति। देशरूपस्य शरीरस्य हितं देशस्य प्रजारूपाणामङ्गानां हितेन सह सम्बन्धं धरति।

एतं विचारं स्पष्टोकुर्वन् श्रीपालः कथयति यत् "शरीरस्य प्रत्येकमङ्गं स्वध्येयसिद्धि न केवलं निजहिताय कामयते, परन्तु समग्रशरीरस्य हिताय कामयते। शरीरस्य रचनातन्त्रं यावत् सक्रियं तावदेव अङ्गानां जीवनं भवति। यथा शरीरं, तदङ्गानि च परस्परं संयुक्तानि भवन्ति तथैव राष्ट्रं तदन्तर्गताः नागरिका अपि परस्परं सम्बन्धिताः सन्ति। शरीरस्य रचनातन्त्रं प्रथमं विकसति तदनु अङ्गानि विकसन्ति। अङ्गानि परिवतन्ते परन्तु शरीरस्य रचनातन्त्रं तथैव तिष्ठति। इत्थमेव राष्ट्रे जनः जन्म लभते पुनश्च म्रियते परं राष्ट्रमविरतं तिष्ठति।

A person may come and a person may go, but the nation will go for-ever.

हिन्दी-राष्ट्रियवादः

एतत्सकलं जगत् ब्रह्मरूपस्य नारायणस्य व्यक्तस्वरूपं वर्तते, अत एव हिन्दुतत्त्वज्ञाने मूलतः मानवत्त्वं विचार्यते। विश्वं नारायणस्य व्यक्तस्वरूपं तथा तस्य विविधभागाः अर्थात् नानाविधराष्ट्राणि। भारतीयसंस्कृतौ विचारधारायां 'वसुधैव कुटुम्बकम्'

इत्युदात्तभावना यत्र तत्र सर्वत्र दरीदृश्यते।

बिपिनचन्द्रपालस्य राष्ट्रवादविचारः आध्यात्मिकदृष्ट्या परिपूर्णः वर्तते। यूरोपीयराष्ट्रवादविचारः भौतिकदृष्ट्या प्रपूरितः। एतयोः विचारयोर्मध्ये भेदज्ञानमावश्यकं भवति।

पालस्य मतानुसारं यूरोपीयराष्ट्रवादे हिन्दीराष्ट्रवादे च मूलभूतो भेदः अयमस्ति यत् यूरोपीयराष्ट्रवादः विस्तारे भारं निदधाति तर्हि हिन्दीराष्ट्रवादः संस्कृतौ भारं स्थापयति। आर्थिकसङ्घर्षः, औद्योगिकस्पर्धा, शत्रुतावृत्तिश्च यूरोपीयराष्ट्रवादस्य मूले वर्तन्ते यतः स राष्ट्रवादः अधिकविस्तार-विजयवृत्तियुक्तः वर्तते। अननैव कारणेन एकं राष्ट्रमन्यस्यात् राष्ट्राद्विभक्तमभवत्। एवंप्रकारकः राष्ट्रवादविचारः अनिवार्यरूपेण सङ्कुचितः, स्वार्थी, असहिष्णुः, आक्रामकश्च वर्तते। यूरोपीयराष्ट्रवादे एतत्सर्वमवलोकयितुं शक्यते।

एतादृशः राष्ट्रवादः भारते कुत्रापि कदापि न विकसितः। हिन्दीराष्ट्रवादस्तु सांस्कृतिकैक्ये विश्वसिति। परिणामतः सङ्घर्षस्य, उद्धततताया, एकलतायाश्च वृत्तिः अत्र न स्वीक्रियते। **'तेन त्यक्तेन भुञ्जीथाः'** इत्यादर्शः भारतीयसंस्कृतौ वर्तते, अत्र कश्चित् अपरस्य भागं नापहरति, अतः हिन्दीराष्ट्रवादः सर्वश्रेष्ठः वरीवर्ति।

राष्ट्रवादस्य मूलानि

बिपिनचन्द्रपालस्य मते सांस्कृतिकैकता हिन्दीराष्ट्रवादस्य मूलभूततत्त्वमस्ति। इतिहासः एतस्य साक्षी वर्तते यत् हिन्दीसभ्यतायाः सर्वासु संस्थासु परम्परासु च सांस्कृतिकैक्यं प्राणरूपेण वर्तते। हिन्दीराष्ट्रवादेन सूचितं व्यक्तित्त्वमिदमेव वर्तते। पुराकालादेव अत्र सांस्कृतिकैकता प्रचलतितराम्।

सांस्कृतिकैकताम् अवगन्तुम् इटलीदेशस्य माझी निष्फलः जातः। एतस्य कारणमासीत् - सरले समाने च सामाजिकजीवनमूले राष्ट्रभावनायाः जागरणम्। अत एव यूरोपियनटीकाकाराः हिन्दीराष्ट्रवादावबोधे असमर्था बभूवुः। **'विविधतायाम् एकता भारतस्य विशेषता'** इति सूत्रं ते नावगच्छन्।

किन्तु इस्लामधर्मस्य विकासस्य कारणेन हिन्दीसंस्कृतेः एकताभावे किञ्चित् परिवर्तनमभवत्। अधुना संस्कृतौ समन्वयोऽपेक्षितआसीत् तेन च भारते नवीना राष्ट्रियोत्क्रान्तिः प्ररब्धा।

समन्वयसंस्कृतिः

अत्र द्वयोः विभिन्नसंस्कृत्योर्मध्ये ऐक्यभावस्थापनस्य प्रश्नः समुत्पन्नः अत्र ऐक्यस्थापनायै नैतिकौएकता महत्त्वपूर्णा जाता। हिन्दवः, मुस्लिमजनाः च परस्परम्

ऋणिनः अभवन् येन नवीना भातृभावना जागृता। राष्ट्रवादस्यास्मिन्नवीनपरिप्रेक्ष्ये समवायतन्त्रस्य पुरातनविचारः अधिकमर्थगम्भीरः अर्थसूचकश्च जातः, तस्य व्यापकोपयोगस्य आवश्यताऽनुभूता।

धर्मसंस्कृत्योः ऐक्यभावस्य पुरातनविचारः अधुना सामाजिक-सांस्कृतिक-राजकीयैकतासन्दर्भे विचारितोऽभवत्। विविधसंस्कृतिषु सामञ्जस्यं स्थापयन्ती भारते एका नूतना संस्कृतिरुद्भूता। भारतस्य एतां परिस्थितिं ज्ञातुमवगन्तुं च बिपिनचन्द्रपालः अरविन्दघोषश्च समर्थौ अभवताम्। 'न्यू इन्डिया' पत्रे लिखिते लेखे श्रीपालः विज्ञापयामास इदं नवीनभारतं हिन्दूनां मुस्लिमजनानां ब्रिटिशजनानाञ्च महासभ्यतायाः प्रतिनिधित्वं प्रस्तौति।''

आध्यात्मिकराष्ट्रवादः

बिपिनचन्द्रपालः आध्यात्मिकराष्ट्रवादेस्य निष्णातः आसीत्। सोऽकथयत् - ''व्यक्तिवत् राष्ट्रे अपि प्राणाः भवन्ति। राष्ट्रवादस्य राष्ट्रवाद्यान्दोलनस्य अर्थः केवलं राजकीयाधिकाराणां प्राप्तिर्नास्ति। देशे निवसतः नागरिकस्य देशेन सह सम्बन्धः भवति, अयं सम्बन्धः शरीरस्य रचनातन्त्रैः सह अङ्गानामिव भवति। शरीरस्य रचनातन्त्रं यदि स्वस्थं भविष्यति तर्हिअङ्गान्यपि स्वस्थानि भवन्ति। तथैव देशस्य नागरिकाणाञ्च मध्ये सम्बन्धः वर्तते। देशस्य हितेन सह मानवस्य हितं संयुक्तमस्ति। उभावपि परस्परं सहायकौ पूरकौ च भवतः।''

बिपिनचन्द्रपालस्य मतेन अयं विचारः कुटुम्बे, जात्यां, देशे सर्वत्र समानरूपेण सङ्घटते। सः मन्यते स्म यत् अस्माकं देशः साक्षिभावेनाध्यात्मिकीं जागृतिं पश्यति। परिणामतः परिस्थितिरियं केवलं राजकीयार्थिकान्दोलनस्य सन्दर्भे मन्तुं न शक्यते। आध्यात्मिकराष्ट्रवादः रुढिगतपरम्परायाः पर्यायरूपेण न मन्तव्यः, यतः रुढिगतपरम्परातः अयमाध्यात्मिकराष्ट्रवादविचारः प्रगतिशील, उत्कृष्टः, सत्त्वशीलश्च वर्तते।

बिपिनचन्द्रपालः वास्तविकपरिस्थित्यनुकूले चिन्तने सक्षमो बभूव। सः राजनीतिं शारिफलक्रीडया सह तुलयति स्म। सः चिन्तयति स्म यत् राष्ट्रवादस्य आन्दोलनं ब्रिटिशसर्वकारस्य युक्ति-प्रयुक्ति-गतिविधीनाम् आधारेण भवितुं शक्नोति। प्रतिपक्षे का नीतिः प्रचलति तामवलोक्यैव आन्दोलननीतिः निर्धारयितुं शक्यते।

नवीनराष्ट्रवादस्य धार्मिकतामवलोक्य सः जनानां समक्षं तत्त्वद्वयं स्थापयामास। प्रथमं तु धर्मस्य अर्थात् जीवनस्य दृष्टिकोणेन कस्मिन्नपि वस्तुनि निर्णयशक्तिः। संक्षेपेण

धर्मः जीवनेन सह ओतप्रोतः वर्तते। द्वितीयं च नैतिकमूल्यशिक्षणस्य अनिवार्यत्वम्। नैतिकमूल्यैर्युक्तं शिक्षणमनिवार्यमावश्यकं भवति समाजाय इत्यपि तैः कथितम्।

एतस्य गर्भितार्थः अयमासीत् यत् ब्रिटिशजनान् पुरतः प्रार्थनायाः, न्यायस्य, उदारताया आवश्यकता नास्ति परन्तु आवश्यकता वर्तते स्वात्मनि आन्तरिकशक्तेः संवर्द्धनस्य।

नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता॥

इति श्लोकमनुसरन् सः मन्यते स्म यत् अधिकाराणां कृते याचना न कर्तव्या भवति ते तु स्वयमेव ग्रहणीयाः भवन्ति। एतादृशी मानसिकभूमिका राष्ट्रवादाय आवश्यकी भवति।

राष्ट्रवादि-आन्दोलनम्

बिपिनचन्द्रपालः भारपूर्वकं विज्ञापयामास यदेतत् राष्ट्रवादीआन्दोलनं केवलं केषाञ्चित् जनानामान्दोलनं नास्ति। प्रजाया अपि आन्दोलनेऽस्मिन् सहभागित्वमत्यावश्यकम् । वास्तविकरूपेण अत्र सहस्राधिकाः लक्षाधिकाश्च जनाः सक्रियरूपेण भागमगृह्णन्। अयं राष्ट्रवादः केवलं भावनैव नास्ति परंतु अस्य उद्भवः व्यवहारः उभावपि धार्मिकौ स्तः।

पालस्य मतानुसारं काँग्रेसदलस्य राष्ट्रियान्दोलनस्य प्रचारः; जनसमुदायं सक्रियं कर्तुं निष्फलः जातः। एतस्य प्रचारस्य निष्फलतायाः पालः त्रीणि कारणानि ज्ञापयामास।

निष्फलतायाः प्रथमं कारणमासीत् विदेशीयभाषायां प्रचारकार्यम्। जनाः यां भाषां जानन्ति तस्यामेव प्रचारः भवेच्चेत् जनानां पक्षतः अनुकूलप्रतिभावः प्राप्यते। द्वितीयं कारणं-काँग्रेसदलस्य प्रचारविषये विचाराणामादर्शानाञ्च प्रजायाः विचारैरादर्शैश्च सह मतभेदः आसीत्। अन्तिमं तृतीयञ्च कारणमासीत् प्रचारे धार्मिकसन्दर्भानामभावः येन जनाः प्रेरिता भवेयुः। भारतस्य प्रजासु धर्म ओतप्रोतः अतः धर्मं विना प्रचारकार्यं न कदापि साफल्यं प्राप्नोति इति तु निश्चितमेव।

'वन्दे मातम्' जयनादः

काँग्रेसदलस्य उदारमतवादिनीं नीतिं बिपिनचन्द्रपालः न कदापि समर्थितवान्। 'वन्दे मातरम्' इति जयघोषेण नवीनमान्दोलनं प्रारब्धम्। अनेन नादेन यथा जनाः प्रेरितास्तथा प्रेरणे काँग्रसदलं शक्तं नाभवत्। देशं मातरं मत्वा तं प्रणामं कर्तुं विचार एव जनेषु मातृभूमिं प्रति राष्ट्रवादस्य देशभक्तेश्च संस्कारान् सिञ्चति।

स्वदेशस्य दिवसेषु आध्यात्मिकान्दोलनं यदा प्रारब्धं तदा बिपिनचन्द्रपालेन, मातृभूमिपूजकैः वेदान्तिभिश्च अस्यां दिशि कृतप्रयत्नानां लाभः गृहीतः। सः त्रिचारयामास यत् हिन्दूनां मूर्तिपूजायामपि गौरवप्रदं परिवर्तनमायाति। एतस्याः प्रक्रियायाः प्रारम्भः बंकिमचन्द्र-चटर्जीवर्यस्य 'वन्दे मातरम्' इति गीतेनाभवत्।

राष्ट्रस्य विविधोपक्रमान् बोधयितुं सः हिन्दुधर्मस्य अतिलोकप्रियदेवीनामुपयोगं कृतवान्। अनेन कारणेन देवीपूजया सह मातृभूमेर्भावनाऽपि विकसिताऽभवत्। हिन्दूनां देव्युपासनायां 'माता काली' 'माता दुर्गा' इत्याद्याः बहव्यः उपकारकप्रतिमाः आसन् याः 'वन्दे मातरम्' सूत्रेण सह मिलित्वा राष्ट्रियान्दोलनेन सह एकरूपा अभवन्। एतादृशेन राष्ट्रवादवातावरणेन सम्पूर्णदिशे अलौकिकं वातावरणं निर्मितमभवत्।

नवचिन्तनम्

बिपिनचन्द्रपालः मन्यते स्म यत् धार्मिक विचाराणां प्रतीकानाञ्च गौरवप्रदेन रूपान्तरेण जीवनविषये नवं दर्शनं कारितम्। नवीनहिन्दीराष्ट्रवादस्य आन्दोलनपृष्ठे हिन्ददेशस्य हिन्दूधर्मस्य विचारधारा अवर्तत। मानवे ईश्वरे च ऐक्यभावः वेदान्तस्य केन्द्रीयसन्देशः वरीवर्ति। **'तत्त्वमसीति'** उपनिषद्वचसा एतदेव सुस्पष्टं ज्ञायते। अस्य महावाक्यस्य वैशिष्ट्यं वर्तते यत् अत्र जीवः (त्वम्) परब्रह्म (तत्) भवति (असि) इति भावः निहितः। जीवः शिवः न भवति तथापि जीवः शिव एव वर्तते यः तादृशीं स्थितिमनुभवति।

बिपिनचन्द्रपालः अन्वभवत् यत् एतस्मिन्नान्दोलने आध्यात्मिकमूलमेव नास्ति अत्र तु केवलं देशस्य राजनीतिः वास्तविकतया सह संयोजिता। येन अध्यात्ममूलं विना राष्ट्रगृहस्य निर्माणं न कदापि शक्यमभवत्। अनेन आन्दोलननेन भारतस्य ब्रिटिशव्यवस्थापनस्य सम्यग्विश्लेषणमभवत्। अनेन यथार्थस्वरूपं सर्वेषां पुरतः प्रस्थापितं पुनश्च निश्चयेन प्रमाणीकृतं यत् ब्रिटिशसर्वकारः हिन्दूनां कल्याणं हितं वा न कामयते।

बिपिनचन्द्रपालमतानुसारं नवहिन्दीराष्ट्रवादस्य आत्मा आदर्शस्वराजः आसीत्।

राष्ट्रवादविषये विधेयात्मकविचारः

बिपिनचन्द्रस्य मतानुसारं तेषां राष्ट्रवादविषयकः विचारः नकारात्मकः नासीत्। वस्तुत दृष्टे सति तत्र विधेयात्मकता अर्थात् सकारात्मकता अनुभूयते। यतः तत्र आन्ताराष्ट्रियवादस्य विरोधे किमपि न क्रियते स्म। तन्मतमनुसृत्य ज्ञायते यत् राष्ट्रियत्वम्

आन्ताराष्ट्रियत्वस्य सूक्ष्मरूपं भवति। पालस्य राष्ट्रवादविचारः मानवतया सह आन्ताराष्ट्रियवादेन सह संवादित्वं धरति। रुढिगतहिन्दुविचारधारायां नारायणेन सूचितः विश्वकस्तरीयः देशभक्तिभावः मानवतया सह सामञ्जस्यं स्थापयति। बंकिमचन्द्रेण 'वन्दे मातरम्' इति सूत्रमाध्यमेन भारतवर्षं मातृरूपेण प्रस्तुतम्। अयमपि विचारः अन्त्यन्तं महत्त्वपूर्णः अवधेयश्चास्ति। महाविष्णोः सान्निध्ये मातुः एतादृशं शाश्वतं स्वरूपं विद्यते। इत्थं राष्ट्रं तु मानवत्वे एव निवसति।

बिपिनचन्द्रस्य राष्ट्रवादस्य प्राणः मानवता विश्वबन्धुत्वभावना च वर्तते। **'वसुधैव कुटुम्बकम्'** इत्यादर्शानुरूपं वैरवृतिं विहाय मिलित्वा निवासः, जीवनयापनं च तथा **'सर्वजनसुखाय', 'सर्वजनहिताय'** इत्येतां प्रवृत्तिं कृत्वा मानवतायां भगवद्दर्शनमेव राष्ट्रवादस्य वास्तविकार्थोऽस्ति। 'Live and let live' इत्येता राष्ट्रवादः वर्तते। 'मानवतायाः पराकाष्ठा अर्थात् गूढदेवत्त्वानुभूतिः' इत्यादयः उच्चविचाराः पालस्य राष्ट्रवादव्याख्यायां निश्चप्रचं समाविश्यन्ते।

विचारधारायां परिवर्तनम्

बिपिनचन्द्रपालः यदा द्वितीयवारम् इंग्लैण्डदेशं गतस्तदा तेन वर्षत्रयं यावत् स्थित्वा तत्र प्राप्तानुभवानामाधारेण राष्ट्रवादविचारे महत्परिवर्तनमानीतम्। ई.स. १९०८ वर्षतः १९११ ईसवीयवर्षपर्यन्तं तत्र पालः स्थितस्तदा तेनानुभूतं यद् पृथक्तायाः सार्वभौम-राजकीय-स्वतन्त्रतायाश्चादर्शः भयप्रदः आत्मघातकश्चास्ति। सः नवीनां विचारधारां प्रकटयामास। स उवाच यत् हिन्दीराष्ट्रवादे ब्रिटिशसाम्राज्यवादे च साम्यं स्थापयितुं न शक्यते यतः उभयोः विचारधारायां महदन्तरं विद्यते। हिन्दीराष्ट्रवादस्य हितं ब्रिटिशसाम्राज्यवादस्य च हितं परस्परं विरोधात्मकं भवेत् तदपि योग्यं नास्ति। एतदुपलक्ष्य १९११ ईसवीयवर्षे सः समवायान्तरराष्ट्रियवादस्य अथवा समवायसाम्राज्यवादस्य विचारं प्रवचनानां लेखानाञ्च माध्यमेन प्रकटयामास।

चीन-जापानादीनाम् इस्लामिकान्दोलनानां विषये अयोग्यभयकारणेन बिपिनचन्द्रपालस्य विचारधारायां एतत्परिवर्तनमागतम्। सः वर्तमानसाम्राज्यपद्धतेः मर्यादां प्रति जागृत आसीत्। सः मानवकुलस्य नैतिकैकताविषये सर्वेषां ध्यानमाकर्षयत्। सः अमन्यत यत् नैतिकैकतामाध्यमेनैव आंतरराष्ट्रियवादस्य वैश्विकमानवतायाश्च अनुभवः कर्तुं शक्यते नान्यथा। एतदर्थं समवायसाम्राज्यवादस्य स्थापनं एतस्य मङ्गलाचरणं शुभारम्भो वा वर्तते।

समवायसमाजरचना

स्वदेशीदिवसेषु राष्ट्रियसंगठनस्य राष्ट्रियशक्तेश्च समर्थनं कुर्वन् बिपिनः अधुना समवायससाम्राज्यस्य पक्षधरोऽभवत्। स उवाच वर्तमानपरिस्थितेः सन्दर्भे अयं श्रेष्ठविचारः वर्तते। सैद्धान्तिकविचाररूपेणाऽपि अयं समवायसाम्राज्यवादः श्रेष्ठः वर्तते।

चीनजापानदेशौ विश्वशक्तियुक्तदेशानां पङ्क्तौ शनैः शनैः आगतौ। तेन कारणेन तथा पान इस्लामवादोदयकारणेन भारते नवीनः भयः समुत्पन्नः। निजपुरातनविचारेषु वर्तमानविचारेषु च विरोधित्वं किमपि नासीत् इत्यपि सः कथयामास। देशकालपरिस्थित्यनुरूपाः द्विधापि विचारा अवर्तन्त। उग्रराष्ट्रवादविचारः राष्ट्रं शक्तिसम्पन्नं दृढं च कर्तुमावश्यकः आसीत् अधुना च समाधानवृत्तेः एकीकरणभावनायाश्च महती आवश्यकता अत एव तेषां विचारेषु परिर्वतनमवलोक्यते। समवायसाम्राज्यवादस्य विचारं श्रीपालः अनेनैव कारेणनाङ्गीकृतवान्।

निजसमवायसाम्राज्यवादस्य विचारान् स्पष्टीकुर्वन् विज्ञापयामास यत् कुटुम्ब-जाति-कुल-राष्ट्रादीनि सामाजिकोत्क्रान्तेः क्रमशः सोपानानि सन्ति। जनः स्वीयं स्वातन्त्र्यं परित्यज्य कुटुम्बस्य स्वातन्त्र्यं प्राप्तुं प्रयत्नं कुर्यात् इति स्वाभाविकमेव। इत्थमेव कुटुम्बस्य स्वातन्त्र्यसमक्षं जातेः बृहत्स्वातन्त्र्यं प्रथममावश्यकं भवति। बहुहिताय तुच्छहितस्य त्यागः निःशंसयमपेक्ष्यते। यथोक्तम् -

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥

अस्मिन्सन्दर्भे समवायसाम्राज्यवादे सः राष्ट्रियस्वायत्ततां चिनोति। समवायसाम्राज्यवादस्य योजनायां भारतेन सह ब्रिटेनदेशेन स्वतन्त्ररूपेण सहभागित्वेन च भाव्यमिति पाल ऐच्छत्।

समवायसाम्राज्यवादस्य अयं विचारः राजकीयविचारात् निश्चप्रचं श्रेष्ठ आसीत्। अत्र स्थिताः सर्वेऽपि देशाः आन्तरिकं स्वातन्त्र्यं लप्स्यन्ते परन्तु प्रगत्यै, रक्षणाय च ते परस्परं संयुक्ताः भविष्यन्ति। तयोः परस्परसम्बन्धः शरीरस्य तन्त्ररचनायाः तथा शरीराङ्गानामिव भविष्यति। ते परस्परं स्पर्धकाः न भविष्यन्ति अपितु पूरकाः भविष्यन्ति इति बिपिनचन्द्रपालस्य दूरदर्शिनः विचारा आसन्।

*

प्रकरणम् - ९

।। स्वराज्यं स्वदेशित्वञ्च ।।

पार्श्वभूमिका

स्वदेशीययान्दोलनात्पूर्वं बिपिनचन्द्रपालस्य आंग्लसाम्राज्ये राजकीय–पूर्वश्रद्धा अतीव आसीत्। पूर्वं सः ब्रिटिशसंबंधस्य प्रशंसकः आसीत्। तस्य व्यवहारे न्याये च विश्वासः आसीत्। ब्रिटिशसाम्राज्यं बहिस्तात् सुचारु भाति अन्तस्तात् तु तत्र विकृतयः आसन् इति तेन पश्चात् ज्ञातम्। पालेन ब्रिटिशप्रशंसायां कथितं यत् ''ब्रिटिशसर्वकारं प्रति मम आन्तरिक भावाः नितान्तविश्वासपूर्णाः मे अधिकाराः सुरक्षिताः सन्ति।''

१८८६ ई.स. राष्ट्रियसभायाः द्वितीयसत्रे बिपिनचन्द्रपालेन भागः गृहीतः। सिलहटप्रतिनिधि रूपेण सः आसित्। न्यायाधीशेन सञ्चाल्यमानः न्यायतन्त्रव्यवहारस्य कालावधिः अधिकः भवतु इत्यस्मिन् विषये सः स्वानुमतिं दर्शितवानः। सामाजिकपरिवर्तन कार्ये ब्रिटिशस्थानां सहकारः अपि आसीत्।

आचारसंहिताया विकटः मार्गः

हिन्दीराष्ट्रियमहासभायाः (I.N.C.) तृतीयं अधिवेशनं ई.स. १८८७ वर्षे मद्रासनगरे मिलितम् । अस्मिन् अधिवेशने शस्त्राणां प्रतिरोधविषये तेन स्वमतं प्रदर्शितम्। शस्त्रप्रतिबन्ध–विषये जातस्य नियमस्य विरोधं सः कृतवान्। ब्रिटिशसर्वकारे तेस्य तादृशः विश्वासः यत् ते किमपि करिष्यन्ति चेत् लोकविश्वासपूर्वकं एवं करिष्यन्ति।

पालस्य विश्वासः औदार्यपथवादिषु ब्रिटिशसर्वकारे च आसित्। तथापि स्वविचारदृष्ट्या तेन एकः भिन्नः विचारमार्गः स्वीकृतः।

ई.स. १८९८ तः ई.स. १९०० मध्ये सः इंग्लेन्डस्य अमेरिकादेशस्य च यात्रां कृतववत् तत्र विविधस्थलेषु दत्तप्रवचनेषु भारतदेशान्तर्गतब्रिटिशसर्वकारस्य तेन प्रशंसा कृता पक्षः च गृहीतः तत्र बहूनि कारणानि आसन्।

सर्वकारः यदि किमपि असत्यं करोति चेत् सत्वरं एवं सः तस्य विरोधं करोति स्म। तदर्थं बहूनि उदाहरणानि सन्ति।

क्रान्तिकारिपरिवर्तनस्य मार्गे

ई.स. १९०४ तः १९०८ यावत् तस्य राजकीयविचारेषु मूलतः अर्थात् आमूलं

परिवर्तनमागतम्। एतस्मिन् परिवर्तने देशे जातानां प्रसङ्गानां घटनानां सहयोगः आसीत्। राजकीयार्थिकसामाजिकक्षेत्रषु राष्ट्रे, राष्ट्रात् बहिः अपि कानिचित् कारणानि तादृशानि जातानि, यैः क्रान्तिकारी परिवर्तनमागतं श्रीपालस्य जीवने।

हिन्ददेशीय-मध्यमवर्गस्य शैक्षिकजनानां निम्नस्थितिं दृष्ट्वा, आपणव्यवस्थाकारणेन हिन्ददेशीयजनानां परदेशीयोद्योगसाम्मुख्येन च ब्रिटिशजनानां यः व्यवहारः आसीत् तत् सर्वं दृष्टवा परतन्त्रराष्ट्रवशात्वात् या मानहानिः जाता तस्मात् क्रान्तिकारिविचाराणामुदयः जातः। एतादृशेषु नवचेतनापूर्णविचारेषु बकिंमचन्द्रचेटरजी महोदयस्य स्वामि-विवेकानन्दस्य च योगदानम् आसीत्।

आन्तराष्ट्रियप्रसङ्गैः घटनाभिः हिन्दे जातेषु कार्येषु नूतनवेगसञ्चारः कृतः।

(१) १८९६ तमे वर्षे ईटलीदेशस्य पराभवः।

(२) १८९९ तः १९०२ यावत् बोयेर युद्धम्।

(३) चीनपेरिसदेशयोः क्रान्तिकारि प्रणालिः।

(४) ई.स. १९०५ वर्षे जापानदेशस्य रशियादेशोपरि विजयः।

(५) ई.स. १९०५ वर्षस्य सफलभूता रशियनक्रांतिः।

एतैः कारणैः क्रान्तिकारिविचाराः प्रोत्साहिता सञ्जाताः। हिन्दराष्ट्रे राजकीय-क्षेत्रे प्रगतिशीलैः नेतृभिः यत्र आमूलपरिवर्तनं कृतं तत्र पालस्य श्रेष्ठं योगदानं वर्तते। बिपिनचन्द्रपालस्य विचाराः क्रान्तिकराः अभवन्।

पालस्य विचारेण आमूलपरिवर्तने ब्रिटिशसर्वकारेण आचरितं बंगालप्रदेशस्य विभाजनं मुख्यम् आसीत्। अयं प्रदेशः शिक्षितानां क्रान्तिकारिणां भूमिः आसीत्। अत्र हिन्दूनां बाहुल्यम् आसीत्। ब्रिटिशसर्वकाराय अयं प्रदेशः भयरूपः आसीत्। अतः सर्वकारः सावधानः अभवत्। ब्रिटिशसर्वकारः अस्य मार्गं अन्वेषयति स्म। येन केन प्रकारेण मार्गः प्राप्तव्यः तदर्थं चिन्ताशीलः आसीत्। लोर्डकर्जनः बुद्धिप्रयोगं कृत्वा बंगालप्रदेशस्य विभागद्वयं कृतवान्। विचक्षणकर्झनमहोदयेन तादृशः पक्षः विभागः कृतः यत्र एकस्मिन् स्थाने हिन्दुजनाम् एकत्र च यवनानां बाहुल्यम् आसीत्।

कर्झनमहाशयस्य एषा कूटनीतिः विचक्षणराजनेतृणां ध्याने आगता। कार्यदक्षता तु कथनमात्रमेव आसीत्। एतत् ज्ञातुं राजनेतृभिः नाधिकः कालः गृहीतः। संपूर्णदेशे बंगालप्रदेशविभाजनस्य विरोधः जातः।

उग्रविचारमार्गे बिपिनः

बिपिनचन्द्रपालस्य ध्याने अपि एषा कूटनीतिः आगता। उग्रविचारान् विना हिन्दूनां हितं न भविष्यति। ई.स. १९०४ तः १९०८ यावत् लालबालमहोदयाभ्यां सह पालः सम्मिलितः; येन देशेन सा त्रिपुटीः प्राप्ता या लालबालपाल इति नाम्ना प्रसिद्धा वर्तते।

पालस्य ब्रिटिशसर्वकारात्, औदार्यमतवादिनां कार्यप्रणाल्याः च विश्वासः व्यपगतः। तेन कथितम् "इमे उदारवादिनः भिक्षुकरूपाः दरिद्रविचारपूर्णाः च सन्ति। "Beggers are never the choosers" इति न्यायेन सः दृढविश्वासपूर्णः अभवत्। स्वतन्त्रतायाः एवं अधिकाराणां याचना कर्तव्या न भवति स्वबलेन ते स्वीकर्तव्याः भवन्ति। पालेन अग्रे गत्वा राष्ट्रियशिक्षणविषयकाः आदर्शाः राजकीयकार्यक्रमाः च प्रारब्धाः।

स्वराज्यस्य विचारः

यूरोपदेशस्य विचारात् एषा विशाला सङ्कल्पना पालस्य आसीत्। स्वराज्यम् अर्थात् ब्रिटिशशासनाङ्कुशेन विना हिन्दस्य स्वतन्त्रता। दादाभाईनवरोजिमहोदयानां स्वराज्य-विचारेण युक्ताः इमे आसन्। १९०४ तमे वर्षे नवरोजिमहोदयेन स्वराज्यविचारः प्रदर्शितः। पालमतेन एतत् योग्यं नासीत्। पालेन त्रिभिः कारणैः नवरोजीमहोदयानां स्वानुशासनविचाराणां टीका कृता।

(१) ईंग्लन्डं देशः यथा व्यवहरति न तादृशं व्यवहरणीयम्

(२) व्यवहारे न भेदः स्थापनीयः।

(३) ब्रिटिशजनैः अस्माकं विदेशीयसम्बन्धे अङ्कुशाः स्थापिताः न तादृशं मास्तु।

(४) ईंग्लेन्डस्थाः स्वान् जनान् स्वव्यवस्थायै स्थापयन्ति स्म।

इमे सर्वे स्वमातृभूमिं वर्धयितुं प्रयत्नशीलाः आसन्।

एतैः कारणैः तै स्वविरोधः प्रदर्शितः। नवरोजिमहोदयेन सह ब्रिटिशसाम्राज्ये स्वानुशासनस्य वार्ता निरर्थका एव इति। पालेन कथितं दादाभाईमतेन यदस्ति तत् इंग्लेन्डदेशस्य समर्थकत्वेन भवितुमर्हति सहाभागित्वेन न। पालमतेन स्वराज्यम् इति न केवलः राजकीयशब्दः हिन्दस्य सर्वोच्चतत्त्वज्ञानेषु उपनिषत्सु अयं शब्दः प्रयुक्तः ततः गृहीतः। स्वराज्यशब्दस्य अर्थः विस्तृतः वर्तते। हिन्दस्वतंत्रतायाः आदर्शः देशस्यैतिहासिकादर्शैः सह संयुज्यते।

पालमतानुसारं मानवः एव ईश्वरः। हिन्दप्रदेशविशेषस्य स्वतन्त्रता दिव्या प्रकृतिसमा वर्त्तते। वेदानां महावाक्यस्य एतदेव मतम् – **अहं ब्रह्मास्मि। प्रज्ञानं ब्रह्म। अयआत्मा ब्रह्म। तत्त्वमसि ।** एतानि वाक्यानि तस्यैव समर्थनं कुर्वन्ति। तत् अर्थात्

परमं तत्त्वं ईश्वरीयतत्त्वं त्वम् एव असि इति महावाक्येन बोध स एव इति।

दिव्या:तन्त्रताया: या विचारधारा, तस्या: मूलं अस्माकं वेदान्तशास्त्राणामेव गीताया: मतेपि प्रत्येकस्मिन् जने एकमेव दिव्यचैतन्यं स्थितं भवति। सर्वेषां पार्श्वे समाना: अधिकारा: सन्ति।

लोकतान्त्रिकस्वराज्यविचार:

स्वतन्त्रताया: या यात्रा आसीत् तस्या: उत्तरार्धे स्वराज्यस्य विचारं स्पष्टं कुर्वता पालेन कथितं यत् स्वराज्यवाद: आध्यात्मिकध्येयं नास्ति किन्तु सर्वकारस्य एकं स्वरूपमस्ति वा राजकीयसमायोजनमस्ति ।

पाल: कथयति यत् स्वराज्यशब्द: 'स्व' एवं 'राज्य' इति शब्दाभ्यां भवति। तत्र स्व अर्थात् स्वयं वा राष्ट्रे स्ववद्भाव: राज्यम् अर्थात् राष्ट्रम् । अर्थात् राष्ट्रे स्वभाव: स्वस्य भाव: स्थापनीय: । कारणं जनसमूहेनैव राष्ट्रनिर्माणं भवति। पालमतेन वैश्विकी आध्यात्मिकी च या स्वभावगता मति: वर्तते तया मध्यमवर्गनिर्माणं सामाजिकदृष्ट्या बद्धं वर्त्तते। सर्वकारशब्द: वा सर्वकार: लोकानां जनानां जनै: जनेभ्य: वा अस्ति (Of the people, by the people and for the people) सर्वकार: भवति।

विविधानां जातीनां ज्ञातिविशेषानां समूहेन जात: देश: अर्थात् हिन्ददेश:। ये सदा सर्वदा हिन्दप्रदेशे निवसन्ति पूर्वजा: अपि हिन्ददेशात् बहिस्था: न सन्ति अर्थात् पूर्वजा: यदि हिन्दव:, यवना:, बौद्धा, ये केऽपि स्यु: ते हिन्ददेशस्यैव।

पालमतेन या प्रजा स्वराज्याय युद्धं करोति तत् स्वराज्यम् अर्थात् जनशासनं न अपि तु कस्यचिद् एकस्य जातिविशेषस्य अनेन स्वराज्यशब्देन देशस्य सर्वकारस्य सूचनं भवति। जनानां प्रतिनिधिरुपेणकश्चित् स्यात् चेत् तं वारयितुं अपि प्रजा सक्षमा।

स्वराज्यप्राप्ते: उपाया: साधनानि च

पालेन स्वराजप्राप्ते: उपाया: साधनानि च निर्दिष्टानि सन्ति। उदारमतवादिनां विरोध:, विनयपूर्वकं विज्ञाप्यते तथापि विनयपद्धते: कश्चित् अस्वीकारं करोति चेत् तस्य विरोध:। तादृशेषु जनेषु पाल: विचारं न करोति। कुक्कुरपुच्छवृत्ते: अपि स: विरोधी आसीत्।

बलेन स्वराज्यप्राप्त्यै अपि पालस्य विरोध: आसीत्। कस्यचित् वधेन स्वराजप्राप्ति: भवेत् ? इति तेषां मतं नासीत्। निर्वाचने न्यूनजनानां चयनेन स्वराज्यप्राप्ति: न भवेत् केचन सेवाप्रदातार: स्यु: चेत् तै: अपि स्वराज्यप्राप्ति: न स्यात्।

*

प्रकरणम् -१०

।। हिन्दस्य आर्थिकं भविष्यम् ।।

पालः हिन्दस्य भव्यभूतकालतः परिचित आसीत्। ब्रिटिशशासनात् पूर्वं हिन्दः धनपूर्णः स्वतन्त्रः च आसीत्। समृद्धिपूर्णहिन्दः ब्रिटिशसाम्राज्यानन्तरं दरिद्रः सञ्जातः तत् जानाति स्म बिपिनचन्द्रपालः। १८ शताब्द्याः अन्तिम २८ वर्षाणि आर्थिकक्षेत्रे बहु कष्टमयानि आसन्।

हिन्दस्य दरिद्रतायाः विषये सः ज्ञापयति स्म यत् अस्य देशस्य आर्थिकप्रश्नाः बहु कष्टपूर्णाः, तेषां सत्वरं निवारणम् अत्यावश्यकमनिवार्यं च। दीर्घकालीना एषा दरिद्रता। क्षुधया मरणेन जनानां स्थितिः अतिगम्भीरा। जनाः दिन-प्रतिदिनं दीनत्वं प्राप्नुवन्ति। एषा स्थितिः दरिद्राणां उपरि शारीरिकनैतिकरूपेण विपरीतत्त्वं दर्शयति यथा''सर्वे गुणाः काञ्चनमाश्रयन्ते'' एतस्मात् वचनात् विरुद्धं दृश्यते। दरिद्रता इति सर्वदुःखानां मूलम् ''बुभुक्षितः किं न करोति पापम्' अस्याः स्थितेः कारणं किम् ?

अस्याः स्थितेः कारणान्वेषणं कुर्वता पालेन कथ्यते यत् अस्य प्रमुखं कारणं भारते ब्रिटिशप्रजायाः शासनमिति। तत् शासनं अर्थधनपूर्णं येन एतत् जातमस्ति।

आर्थिकशोषणम्

ब्रिटिशसाम्राज्येन एतत् भवति। ब्रिटिशेतिहासविदां मतेन कथयति पालः यत् ब्रिटिशजनानां या प्रवृत्तिः ये च आर्थिकविचाराः तैः एतत् भवति। उदाहरणरूपेण कथयति यत् ई.स. १८१३ तमवर्षस्य प्रसङ्गे हिन्दस्य वस्त्रविशेषस्य मूल्यं ५०% तः ६०% न्यूनधनेन क्रयणं भवति ईंग्लेन्डदेशस्य कृते तु एतत् बहु न्यूनं भवति। हिन्दस्य ये कलावीराः आसन्, दक्षाः, कर्मनिपुणाश्च तेषां तुलनायां ते तु न्यूनाः निम्नाः च आसन्। तस्य ईंग्लेन्डदेशस्य यत् उत्पादनं आसीत् तस्य रक्षणाय इमे ७०% तः ८०% करग्रहणं कुर्वन्ति स्म येन लाभं ते प्राप्नुवन्ति स्म अलाभकारणेन च अस्माकं आर्थिकस्थितिः अधोऽधो गच्छति स्म।

ढाकाप्रान्तस्य ये कलावीराः आसन् ते यस्य निर्माणं कुर्वन्ति स्म तत् सरलं सुचारु आसीत् तेषां दक्षत्वं नाशयितुं इमे ब्रिटिशजनाः कलावीराणां दक्षिणहस्तस्य अङ्गुष्ठं छेदयन्ति स्म।

इतिहासकारः होरेस-हेमेन-विल्सन ज्ञापयति यत् यदि हिन्दः एकः स्वतन्त्रराष्ट्ररूपेण अभविष्यत् चेत् अस्य प्रतिकारः अकरिष्यत्। ब्रिटिशोद्योगे अपि अस्माकं प्रभावः स्यात्। स्वरक्षणस्य मान्यता न आसीत्। हिन्दः परदेशीयानां दयया जीवति स्म। जीवनीयं च आसीत्।

पराधीने सुखं न भवति

ब्रिटिशसर्वकारस्य पुरः हिन्दप्रजा पराधीना आसीत् नासीत् च अपरो मार्गः । पराधीने स्वप्नेऽपि न सुखम् इति तुलसीदासस्य कथनमिदं अक्षरशः सत्यमासीत्। ते सर्वे ईंग्लेन्डप्रजायाः सर्वविधरक्षणायैव सर्वं कुर्वन्ति स्म।

हिन्दप्रजायाः सर्वरीत्या शोषणमेवासीत्। हिन्ददेशः स्वपरतन्त्रतायाः एवं प्रकारेण मूल्यं अर्पयति स्म।

वैदेशिकं धनम्

पालेन कथितं १५० वर्षेभ्यः ब्रिटिशसर्वकारेण अस्माकं धनं स्वीकृतम्। धनेनापि अस्माकं शोषणं कृतम्। आंग्लीयाः धनशोषणं कृत्वा हिन्दप्रदेशस्य साधनसंपत्ति उपयुज्य स्वकीयविकासकार्यं कुर्वन्ति स्म। एषः विकासलाभः हिन्दप्रजया न प्राप्तः। तेन कारणेन हिन्ददेशस्य आर्थिकस्थितिः अपि शिथिला जाता।

कर्मकरा वेतनम् अधिकं प्राप्नुवन्ति स्म किन्तु एषा वृद्धिः अपि अन्ततोगत्वा विदेशं गच्छति स्म। वेतनवृद्ध्या यः विकासः भवति स सर्वविध लाभोऽपि विदेशं गच्छति। एतं लाभं तु कर्मकराः नप्राप्नुवन् न च देशः प्राप्नोत्।

पालमतेन तत् स्पष्टं आसीत्। यूरोपीयदेशाधारेण यः निष्कर्षः आगतः स हिन्ददेशाय न आसीत्। ग्रेटब्रिटेन, जर्मनी, अमेरिकादिदेशेषु जातः वेतनवृद्धिलाभः कर्मकरेभ्यः स्वदेशाय च आसीत् किन्तु भारते सर्वथा निष्फलता लब्धा। तत्रस्थाः ये कर्मकराः आसन् ते दिन–प्रतिदिनं सुखसम्पत्तौ वृद्धिं प्राप्नुवन्ति स्म किन्तु अत्र तादृशं न आसीत्। कर्मकराणां वेतनवृद्धिः राष्ट्रस्य देशस्य संपत्तिवृद्ध्यै आसीत् किन्तु अत्र स लाभः नासीत्। अत्र तु ''एकेन हस्तेन स्वीकृतं अपरेण हस्तेन दत्तम्'' तादृशं आसीत्। वेतनवृद्ध्यै यत् धनं आसीत् तत् ब्रिटिशद्वारा उन्नतमूल्यरूपेण ते पुनः स्वीकुर्वन्ति स्म।

भ्रामकः आर्थिकविकासः

अर्थशास्त्रिणः वेतनवृद्ध्यै गुणगानं कुर्वन्ति स्म किन्तुते तत् न जानन्ति स्म यत् अत्र अधिकं लाभं ते प्राप्नुवन्ति स्म; कर्मकराणां हस्ते कियत् धनं तिष्ठति तत् न जानन्ति स्म। पालेन कथितं वस्तुस्थितेः विश्लेषणं सम्यक् न कुर्वन्ति स्म ते। अस्माकं देशस्यार्थिके विकासे तेषां किञ्चिदपि योगदानं नास्ति। अस्माकं जीवनचर्या या अस्ति तदनुगुणं सर्वं अस्ति।

आर्थिकपरावलम्बनत्त्वं गम्भीरतया जातम्। तैः वर्धितः अस्माकं परावलम्बनस्य मार्गः।

पालः अस्य खेदं दुःखं अनुभूय कथयति यत् ब्रिटिशसर्वकारनीत्या वयं परतन्त्राः अभवाम। प्रायः सर्वक्षेत्रेषु तैः स्वकूटनीत्या एषः आर्थिकलाभः संप्राप्तः आसीत्। हिन्ददेशः लाभं प्राप्नुयात् इदृशं एकमपि सोपानं तेषां न आसीत्।

भव्यभूतकालस्योपेक्षा

हिन्दप्रदेशे यैः स्वस्थानं स्थिरं कृतं तादृशैः ब्रिटिशजनैः अधिकाधिकार्थिकशोषणाय यत्नाः योजनाः च कृताः। तत् दृष्ट्वा अत्यन्तं दुःखम् अनुभवति स्म श्रीपालमहोदयः।

ब्रिटिशजनानाम् एतां शोषणवृत्तिं दृष्ट्वा सः विचारयति स्म यत् साम्प्रतं न कश्चित् हिन्ददेशस्य भव्यभूतकालं स्मरति। ते ब्रिटिशजनाः स्वान् आदर्शान् बलात् अस्माकं उपरि स्थापितवन्तः। ब्रिटिशार्थवादिनः स्वसाहसेन अन्यासां संस्थानां नाम्ना साहाय्येन स्वार्थिकविकासं साधयन्ति स्म। भारते तैः आचरितं महत् दूषणमासीत्।

अधिकं दुःख तु तदनुभूतं पालेन यत् एतस्य कर्मणः किं फलं स्यात् तस्मिन् विषये न कस्यापि पार्श्वे किमपि ज्ञानमासीत्।

परन्तु बिपिनचन्द्रपालः उग्रमतावलम्बिनामिव न तथा चिन्तयति स्म। सः स्पष्टरूपेणाचिन्तयत् यत् यथा ब्रिटेनदेशस्य हिन्ददेशस्य हितं एकस्यां दिशि न निहितं, उभावपि परस्परविरोधिनौ दृश्येते। पालः लिखति यत् सर्वेषु विषयेषु ब्रिटिशशासनस्य हितं हिन्ददेशस्य हितेन सह सङ्घर्षमयं भवति स्म।

सैन्यविषयेऽपि ब्रिटिशसर्वकारः स्वहितमेव अचिन्तयत् तदर्थं च भारतस्य सैन्यहितं अवगणयामास। त्रिंशत्कोटिजनाः कथम् असहाया इव अतिष्ठन्। भारतस्य हितमवगणय्य ब्रिटेनदेशस्य हितं काम्यते स्म। हितसन्दर्भे सः ई.स. १९०७ तमे वर्षे उक्तवान् यत् मुक्तव्यापारनीतिरेव भारतस्य अभिमानपूर्णा आर्थिकनीतिः अस्ति।

साम्राज्यवादस्य प्रथमचयनम् – एकम् आत्मघातकं कार्यम्

बिपिनचन्द्रपालः साम्राज्यवादस्य चयनविषये निन्दन् कथयति यत् इयं नीतिः भारतहितविरुद्धा नीतिः। अयं दुःखस्य विषयः यत् ब्रिटेनदेशेन हिन्ददेशस्य प्राचीनोद्योगाः विनाशिताः अयं च विश्वापणे भारतीयापणे च भारतस्य स्पर्धकोऽस्ति। वस्तुने ब्रिटेनदेशे आधारः स्थापनीयः तथा तस्य देशस्य वस्तुजातं अन्येभ्यः देशेभ्यः उत्कृष्टं वर्तते इति विचारः लज्जाप्रदः सङ्कुचितश्च वर्तते। अनया विरुद्धनीत्या भारतस्य राजकीयार्थिकभविष्ये दुष्प्रभावः भवितुं शक्नोति स्म।

स्वदेशी बहिष्कारश्च

स्वदेशीनामकस्य आन्दोलनस्य प्रणेता श्रीबिपिनचन्द्रपालः बभूव। ई.स. १९०५ तमे वर्षे प्रारब्धस्य अस्यान्दोलनस्य अयं मुख्यः स्थपतिरासीत्। पुनः अनेन स्वेदेशी आन्दोलनस्य नीतिः बहिष्कारेण सह परित्यक्ता। सः मन्यते स्म स्वेदेशीये आन्दोलनं तथा विदेशीयवस्तूनां बहिष्कारः इत्येतौ द्वौ अविभाज्यौ स्तः।

ई.स. १९०५ तमे वर्षे लोर्ड कर्जनः यदा बंगप्रदेशस्य विभाजनं चकार तदा तस्याः नीतेः विरोधे जनाः बहिष्काररूपं सामान्यविरोधं प्रदर्शितवन्तः। परन्तु बिपिनः एतं बहिष्कारम् असहकारान्दोलनाध्यमेन सर्वस्पर्शकं कार्यक्रमं निर्मितवान्।

बिपिनचन्द्रः ईंग्लेन्डदेशस्य प्रत्येकं वस्तुजातं बहिष्कर्तुम् इच्छुक आसीत्। परन्तु केचन नेतारः ईंग्लेण्डदेशस्य यद् वस्तु भारतीयोद्योगहितं न कुर्यात् तदेव वस्तुजातं बहिष्कर्तुम् अवाञ्छन्। अस्यायमभिप्रायः नासीद्यत् विदेशीयवस्तुनि स धिक्करोति स्म परन्तु अनेन भारतीयोद्योगानां हानिः भवति स्म। जनानामाजीविकायाः प्रश्नः समुत्पन्नः। वस्तुतः सः बहिष्कारं कृत्वा देशभक्तेर्भावनामदर्शयत्।

राजनीतिरर्थनीतिश्च परस्पराधारिते

वाइसराय-लोर्डमिन्टो यदैतत् निवेदितवान् भारतीयैः केवलमार्थिकक्षेत्रे एव स्वदेशविचारः कर्तव्यस्तदा श्रीबिपिनचन्द्रपालः एतस्मिन् विषये विरोधं प्रदर्शयन्कथयामास राजकीयक्षेत्रस्य स्वदेशी विचारं विना विचारो आर्थिकक्षेत्रस्य स्वदेशीयविचारः अव्यावहारिकोऽस्ति। एतौ केवलं भारते एव नापितु सम्पूर्णविश्वे संयुक्तौ दृश्येते। अर्थनीतेः राजनीतेश्च अविनाभावेन सम्बन्धो भवति।

बिपिनचन्द्रः कथितवान् – मुक्तदेशे कदाचित् केवमार्थिकस्वदेशीयविचारः शक्यः परन्तु भारतसदृशे देशे यत्र पुष्कलमात्रायां प्राकृतिकसम्पत्तिः असज्जवस्तुनः सज्जवस्तु निर्मातुं योग्यताऽस्ति। परमत्र उत्पादनसाधनानामभावोऽस्ति। एतादृशे देशे राजनीतेः स्वेदेशवादं विहाय अर्थनीतेः स्वदेशवादविचारः असम्भवः अव्यावहारिकश्च। वस्तुतः ब्रिटेनदेशेन भारतस्य उद्योगानां हानेरवरोधाय राजकीयरूपेण किमपि साहाय्यं कर्तव्यम् इति स ऐच्छत्। एतद्विपरीतं ब्रिटेनदेशस्य उद्योगानां विकासाय ते भारतीयोद्योगान् नाशयन्ति स्म। यदा च भारतीयोद्योगाः तैः सह स्पर्धन्ते स्म तदा ते राजकीयसत्तायाः दुरुपयोगं कृत्वा तान् पीडयन्ति स्म। बिपिनचन्द्रपालः अत उभयोरपि भारते विकासमावश्यकम् अमन्यत।

समाजवादविचारः

बिपिनचन्द्रपालः पाश्चात्यसमाजवादे रुचिमस्थापयत्। ई.स. १९१२ तमे वर्षे यूरोपदेशस्य विचारकाः विज्ञापयामासुः, यावत् आर्थिकरूपेण असमानता भविष्यति तावत् केवलं राजकीयतन्त्रं सामान्यप्रजायाः स्वातन्त्र्यं न रक्षिष्यति। ते सविश्वासं कथयामासुः सैद्धान्तिकरूपेण राज्ञः, धनाढ्यानां पाश्वर्तः सर्वा सत्ता प्रजायै दीयते तथापि स्थितिस्तु तथैव भविष्यति। वास्तविकरूपेण सत्ता तु स्थितिसम्पन्नानां धनाढ्यानां पार्श्वे एव स्थास्यति। बिपिनचन्द्रः दृढं विश्वसिति स्म यत् ब्रिटेन–फ्रांस–अमेरिकासदृशेषु लोकतन्त्रिकदेशेषु यथा राज्य–साम्राज्यवादस्वीकृत्या शान्त्या नियमेन च वर्ग–विग्रहस्य अन्तः आनेतुं शक्यः परन्तु जर्मनी–ओस्ट्रिया–हंगरीप्रभृतिषु देशेषु यत्र लोकतान्त्रिकपरिरूपं नास्ति तत्र एतन्न सम्भाव्यते।

बिपिनचन्द्रः रशियनक्रान्तेः अभिप्रभावितो बभूव। श्रमवादिनः अनया भगीरथक्रान्त्या धनवादिभ्यः विमुक्ताः अभूवन्। पालः एतादृशार्थिकशोषणस्य विरोधं चकार।

ब्रिटिशसाम्राज्यवादं भर्त्सय सः कथयामास यथा रशियादेशे जातं तदत्रापि न भवेत्तदर्थं राजकीयस्वतन्त्रायाः आर्थिकस्थितेश्च समुन्नत्यै प्रयत्नं कुरुत। ब्रिटिशकर्मकरपक्षस्य अनुकूलव्यवहोरण एतस्याः विचारधारायाः प्रचाराय प्रोत्साहनं सः प्राप्तवान्। बिपिनः एतदपि सम्यगवच्छति स्म यत् यथा ब्रिटिशधनिकैः सह सङ्घर्ष आवश्यकस्तथैव भारतीयधनिकैस्सहापि सङ्घर्षः करणीयो भविष्यति। धनिकः स्वार्थाय किमपि कर्तुं प्रवृत्तो भवति इति सत्यमेव।

भारतस्य आर्थिकरोगाणामुपायाः

ब्रिटेनदेशस्य धनेन भारतस्य आर्थिकशोषणरूपस्य रोगस्य उपचारानन्तरं बिपिनचन्द्र आर्थिकरोगाणामुपायानपि न्यदिशत्। भारतस्य असहायपरिस्थितिं विलोक्य स दुःखितोऽभूत्।

राज्यसत्ता प्रजासमीपे नासीत्। बिपिनचन्द्र व्यथितः सन्नपि किमपि निर्णयं कर्तुं सक्षमः नासीत्। धनिकानां क्रीडनकसदृशानां जनप्रतिनिधीनां पार्श्वे पूर्णसत्ताऽसीत्। ब्रिटिशसंसद् नाम्नैव लोकतन्त्रं धरति स्म परन्तु वास्तविकरूपेण धनिकानां भृत्याऽसीत्। भारतेऽपि ब्रिटिशधनिकानां प्रतिनिधिरूपा 'इन्डियन चेम्बर्स ओफ कोर्मस' इत्यभिधेयसंस्था प्रभुत्वं दधार। बिपिनचन्द्रपालः भारतस्य आर्थिकरोगाणां निवारणाय

त्रीनुपायान् सूचितवान् – (१) ब्रिटिशकर्मकरपक्षेण सह संयोगः (२) कर्मकराणां स्थितौ समुन्नतिः (३) अधिकलाभे करव्यवस्था।

मुक्तभारतस्य आर्थिकं चित्रम्

बिपिनचन्द्रपालः मुक्तस्य समृद्धस्य च भारतस्य स्वप्नद्रष्टाऽसीत्। सः मुक्तभारतस्य यत्स्वप्नं ददर्श तत्र न कश्चित् धनवादः, साम्राज्यवादः, शोषणवादश्च। ग्रामः तस्य मूलस्थलं भविष्यति, यत्र सर्वाः सुविधाः भविष्यन्ति। तन्मतानुसारं ग्रामे लघुसामयिककार्याणि, चिकित्साशिक्षणं तथा दुर्भिक्षादीनां प्रतिकारसाधनानि भविष्यन्ति। ग्रामीणाः जनाः निजपरिश्रमेण, सहकारेण, व्यवहारेण, संस्थानां च साहाय्येन समस्यानां समाधानं कर्तुमर्हास्सन्ति।

इत्थं पालः पाश्चात्यार्थनीतेः भारतीयवित्तव्यवस्थायाः विषये सम्यगभ्यासं चकार। सः स्वयं ख्यातनामा न कश्चिदर्थशास्त्री तथाऽपि तस्य आर्थिकक्षेत्रस्य चिन्तनं प्रभावकं प्रभुत्वसम्पन्नञ्चासीत्। स्वाभाविकमेतत् यत् तेन सूचितेषु उपायेषु भवतु नाम क्षतिस्तथापि अद्यपर्यन्तं तस्य सूचनाः सादरं भारतीयैरवधीयन्ते।

बिपिनचन्द्रः इत्थम् अर्थनीतेः राजनीतेश्च समानं महत्त्वं मन्यमानः अविभाज्याङ्गत्वेन भारते उभयोः आवश्यकतां स्वीचकार।

*

प्रकरणम् - ११

॥ भाव–प्रतिभावाः ॥

बिपिनचन्द्रपालस्य विषये विशेषेण ज्ञातुं तत्कालीनमहानुभावानां विचाराः अतीव महत्त्वपूर्णास्सन्ति। तेषु केषाञ्चन महानुभावानां प्रतिभावः संक्षेपेणाधः प्रस्तूयते।

अरविन्दघोषः

अरविन्दघोषः पालस्य बलिदानवृत्तिं प्रशंसन् निजगाद – सः 'वन्दे मातरम्' इत्यारोपे न्यायालये प्रतिज्ञां न नीतवान् कथितवान् च – अहमस्मिन्विषये न किमपि वक्तुमिच्छामि। न्यायालयस्य अवमाननया तिरस्कारेण च षण्मासाना कारावासदण्डं प्राप्तवान्। न्यायालये बाधायाः अधिकादधिकं षण्मासानां कारावासदण्डस्य नियमः आसीत्। बिपिनः न्यायालयप्रक्रियायामवरोधमुत्पादितवान् तदर्थं न्यायालयः यधण्डं दत्तवान्, तं हसन् सः स्वीकृतवान्।

बिपिनचन्द्रपालः स्वपक्षं स्पष्टीकुर्वन्नाह एतन्नागरिकस्य परमं कर्तव्यमस्ति यत् अभियोगे यदि अन्यः भवेत्, सामाजस्य हानिः स्यात्, देशस्य शान्तिप्रक्रिया भग्ना भवेच्चेत् तत्र सः भागं न गृह्णीयात्। न्यायालयः यस्मिन्नाभियोगे अवरोधापराधं गणयित्वा बिपिन्नचन्द्रं दण्डमयच्छत् वस्तुतः तत्र तस्य दोष एव नासीत्। (बिपिनः किमप्यकथयन्दण्डकालं यापयामास, येन समाजे तस्य सुमहती प्रतिष्ठा जाता।)

डी. ऐन. बेनरजी

बिपिनचन्द्रपालः अस्मन्मतानुसारम् उग्रवादी क्रान्तिकारी नासीत्। सतु हिन्दीराष्ट्रवादी आसीत् यस्य राजकीयादर्शः तं किमप्ययोग्यं समाधानं कर्तुं न प्रेरयति स्म।

विकटपरिस्थित्यां तर्कपूर्णं चिन्तयित्वा भारतीयराजनीतिचिन्तकेषु स अग्रस्थानं प्राप्तवान्। चिन्तनशीलराजपुरुषरुपेण उदीयमानं भारतजनमानसं सः प्रभावितवान्। युवावर्गः राष्ट्रियताविषये गर्वेण चिन्तयित्वा स्वनिर्णायकताया स्वसहायतायाश्च विषये अस्मात् बहु शिक्षितवान्। स्वविचारणां संस्थापनाय प्रसाराय च सः संगठनं निर्मितवान्। भारतीयाः संगठिताः भूत्वा स्वशक्त्या राज्यं प्राप्तुमर्हन्ति इति तस्य दृढविश्वासः आसीत्।

राजकीयान्दोलनय प्रारम्भसमये प्रजासु तस्य विचाराणां बहु प्रभावः उत्पन्नः/ जातः, येन जनाः जागृता अभवन्।

अरूप चक्रवर्ती

बिपिनचन्द्रपालं जन्मनैव क्रान्तिकारिरूपेण परिगणयन् अरूपचक्रवर्ती कथयामास – सः कुटुम्बेन, समाजेन, महाविद्यालयेन मित्रैश्च सहापि निजादर्शानां सन्दर्भे समाधानं नाकरोत्। सः आदर्शपालनाय सर्वं किमपि सोढुं समर्थः आसीत्।

छात्ररूपेणापि एतस्य स्वभावं सर्वे ज्ञातवन्तः। अस्य मातुः प्रथमपुण्यतिथावेव एका घटना संजाता। मातुः श्राद्धकर्म सः वर्षपर्यन्तं पुरोहितस्य कथनानुसारं चकार। परन्तु वर्षात् पूर्वमेव एतस्य धार्मिकविधेः विषये विरोधं प्रदर्शितवान्। स्वपितरमपि सः एतस्य अन्धश्रद्धायुतं विधिं न कर्तुं परामर्शं ददौ। पितापुत्रयोर्मध्ये सङ्घर्षस्य प्रारम्भः अस्मादेव जात आसीत्।

बिपिनचन्द्रपाले सांस्कृतिकमूल्यानि प्रति प्रेम तथा मानमासीत्। राजनैतिकस्तु स अनन्तरमभवत्। विधवा–विवाहस्य समर्थनं तथा बाल–विवाहस्य विरोधं स निजप्रवचनेषु बहुधा कृतवान्।

जातिवादस्य अस्पृश्यतायाश्च सः प्रखरविरोधी आसीत्। कुप्रथानां दूरीकरणाय स जीवने सदैव प्रयत्नशीलो बभूव। पालः आन्तरिकरूपेण क्रान्तिकारिवृत्तेः बाह्यरूपेण च नम्रः आसीत्।

अमलहालदारः

भारतस्य स्वातन्त्र्यान्दोलने बिपिनचन्द्रस्य योगदानं महत्त्वपूर्णमासीत्। ई.स. १८८२ तः ई.स. १९३२ वर्षपर्यन्तस्य सामायिकजीवने सः बंगालस्य भारतस्य च जनतायाः स्वतन्त्रतायै बहु प्रयत्नमकार्षीत्। स धार्मिक–सामाजिक–राजकीयक्षेत्रेषु लेखन्या जनजागृतिकार्यं कृतवान्। एषः स्वविचारधारायाः स्वराज्यसिद्धान्तानां च जनेषु प्रचारं कृतवान्।

प्रकृत्या सः भावुकः, स्पष्टवक्ता, क्रान्तिकारी आसीत्। स्वतन्त्रतान्दोलनविषये मनसि आगताः विचारा लेखानां माध्यमेन प्रकटयति स्म। पालस्य भारतस्य राष्ट्रियान्दोलनप्रवृत्तौ प्रदत्तं योगदानं सर्वेऽपि एकमतेन स्वीकुर्वन्ति स्म। अस्य प्रभावकराष्ट्रियप्रचारेण विरोधिनोऽपि अकम्पन्त।

सम्पूर्णजीवनपर्यन्तं सः पत्रकाररूपेण जीवनं यापयामास। तस्य तत्त्वज्ञानसभरैर्लेखैः जनाः यथार्थदिशं प्राप्नुवन्।

*

प्रकरणम् - १२

।। एकलः बिपिनः ।।

ई.स. १९२० तम वर्षे बिपिनचन्द्रपालः स्वतन्त्रतान्दोलने नतृरूपेण अधिकां प्रसिद्धिं न अवाप। अस्य नेतृत्वं प्रजासमुदायं नाकषयत्। अस्य कारणं प्रायः पालस्य अधिकाभ्यासः तर्कबद्धचिन्तनञ्चासीत्। जनाः एतस्य अभिप्रायज्ञाने असमर्थाः आसन्। तर्कबद्धं चिन्तनपूर्णं च प्रवचनं केवल सुधियः प्रबुद्धा एव अवागच्छन् तत्काले प्रजा प्रायशः शिक्षिता अभ्यासशीला नासीत्।

यः जनः पञ्चाशद्वर्षाणि देशं सिषेवे। यः सामाजिकराजकीय–धार्मिक क्षेत्रेषु विद्यमानानां समेषां प्रश्नानां चिन्तनं कृत्वा, समाधानाय प्रयासमकार्षीत्। यस्य दूरदृष्टिः अतिसूक्ष्मा आसीत् सः जीवनस्य अन्तिमवर्षेषु एकलः सञ्जातः समाजे च उपेक्षितोऽभवत्। तस्य हृदि कीदृशी वेदना जाता स्यात्? इति विचारयितुमपि न शक्यते। बिपिनचन्द्रः एतां परिस्थितिं स्वीकृत्य स्वजीवनं यापयामास। जीवनस्य स्वर्णिमदिनानि देशवासिनां हिताय येन यापितानि, सः नूनमेव इच्छति यत् अन्तिमवर्षेषु जनाः मां न विस्मरिष्यन्ति, नावगणयिष्यन्ति च।

सन्दर्भेऽस्मिन् अमल-रॉयः लिलेख–अहं तस्य जीवनस्य अन्तिमवर्षाणां करुणस्थितेः साक्षी आसम्। पालः एकाकी भूत्वा स्वजीवनं जीवति स्म। दृश्यमिदं दृष्ट्वा सर्वे वयस्याः व्यथिता आसन् परन्तु बिपिनचन्द्रः निर्भयतया एतां परिस्थितिं सोढ्वा अकथयत् ''अद्य राजनीतौ ये सर्वस्वरूपेण स्थिताः, श्वः ते सर्वोपरिणः न भविष्यन्ति।''

जीवनस्य अन्तिमवर्षेषु बिपिनचन्द्रः एकलः सञ्जातः आन्दोलनस्य च मुख्यप्रवाहाद् वियुक्तः जातः। अस्याः परिस्थितेः प्रमुखं कारणेषु महात्मगान्धिनः विचारधारां प्रति स्वराज्यदलस्य राजनीतिं प्रति च तस्य विरोधः आसीत्। द्वितीयं पालस्य राजकीयतत्त्वज्ञानस्य उच्चसिद्धान्तावबोधे प्रजा समर्था न जाता, परिणामेन समाजे तस्याः विचारधारायाः एतावद्विस्तारः न जातः।

तथाऽपि बिपिनचन्द्रपालः राष्ट्रियनेता एवं उत्कृष्टविचारक आसीत्। सः न केवलं राजनैतिकः अपितु राजपुरुष आसीत्। दृष्टियुतं गभीरचिन्तनशीलञ्च एतं राजपुरुषं भारतस्य प्रजा नावगच्छत्।

राजकीयनेतुषु प्रभावः

बिपिनचन्द्रपालस्य विचारधारया एम.एन. रायः प्रभावितोऽभवत्। तथापि स कदापि समेषां पुरतः पालस्य विचारधारां न प्राशंसत्। जनसभासु पालस्य विचारधारायाः निन्दकस्य एम. एन. रायस्य मानवताहितवादी विचारधारा पालस्य विचारधाराया परिणाम आसीत्।

स्वदेशी आन्दोलनसमये प्रस्तुतान् कतिपयविचारान् महात्मागांधी स्वयं स्वीचकार। मद्यपाननिषेध–विधवाविवाह–बालविवाह–स्त्रीणां सामाजिकबन्धनान्मुक्तिः इत्यादयः विचाराः गांधिमहोदयेनापि समर्थिताः। एतेषामेव विचाराणाम् असहकारान्दोलने गांधिमहोदयेन समावेशः कृतः।

जनानां हितस्य, कल्याणस्य सन्तोषः तस्य मनसि आसीत्। मईमासस्य विंशतिदिनाङ्के १९३२ ईसवीयवर्षे बिपिनचन्द्रपालः नश्वरं संसारं विहाय दिवं गतः। इत्थमेतस्य महापुरुषस्य इयं जीवनगाथा समाप्तिमेति।

***

ISBN - 13 - 078-81-925721-1-6

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info